UPANISAD-VAKYA-MAHA-KOSA
VOL I
BY
S.GAJANAN SHAMBHU SADHALE

SRI GARIBDASS ORIENTAL SERIES NO. 44

UPANIŚAD-VĀKYA-MAHĀ-KOŚA

Vol. I

(अ to न)

S. GAJANAN SHAMBHU SADHALE

SRI SATGURU PUBLICATIONS
DELHI—INDIA

Distributed by
INDIAN BOOKS CENTRE
Exporters of Indian Books
40/5, Shakti Nagar
Delhi-110 007
(INDIA)

Acc. No.:- 6085
Date :- 27-07-2009
Cost :- Rs 500/- Set of two vols.
RAMAKRISHNA MISSION
Acc. No 6085
Date 27-07-2009

Published by
© SRI SATGURU PUBLICATIONS
Indological and Oriental Publishers
40/5, Shakti Nagar
Delhi-110 007
(INDIA)

First Published : Bombay 1940-41

Second Edition : Delhi, 1987.

I.S.B.N.—81-7030-095-9 (Set)

I.S.B.N.—81-7030-096-7 (Vol. I)

I.S.B.N.—81-7030-097-5 (Vol. II)

Printed in India at :
Chaman Offset Press,
Delhi—110006.

अर्पणपत्रिका ।

—**—

श्रीमन्महाराष्ट्रीय–भारतीय–संस्कृतासंस्कृतांग्लीयाद्यनेकभाषाभिज्ञानां सम्पादितोप-
युक्तविद्यानां वीर्यशौर्यधैर्यौदार्याद्यखिलगुणगणसम्पन्नानां स्वाचार–विचार–
विहार-सञ्चार-दक्षाणां शारद-नादेयतोयचयविशदहृदयानां पितृपिता-
महादिपूर्वजसम्पादिताः 'जिन घर-जिन तख्त- सेनाखासखेल
समशेर वहादुर' इत्यादिपदवीरनुस्मृतानां गायकवाड-
वंशविभूषणानां राजाधिराजानां श्रीमद्युवराज-
फत्तेसिंहसुतानां श्रीमतां प्रतापसिंहेत्यभिधा-
नानां राज्ञां कमनीयकरकमलयोरयं
उपनिषद्वाक्यमहाकोषः
सानन्दं सादरं च
समर्प्यते

पितेव रक्षञ्जननीव पोषयन्स्वपुत्रवत्स्वीयजनं च पालयन् ।
अधीतविद्यां च विवर्धयन्सदा राजन्विवर्धस्व भव प्रजार्थिभाक् ॥

UPANIŜAD VĀKYA–MAHĀKOŜA

PRESENTED TO

His Highness

Maharaja Pratapsinha Gaekwar

SENAKHASKHEL, SAMSHER BAHADUR

The noble and just king of Baroda, ever loved and honoured by his loyal subjects both rich and poor; A scholar of many languages, like Sanskrit, English, Hindi and Marathi; A gentleman endowed with all the good qualities and virtues, like honesty, valour, fortitude and generosity, and very proficient in Raj-niti, politics and economics.

By the Author

श्रीमत्प्रतापसिंहनृपत्यभीष्टचिन्तनम् ।

वटोदराभिधे पुरेऽतिरम्यमन्दिरे पुरा
प्रजाप्रियः सुनीतिमान्सुरम्यहर्म्यवासकृत् ।
श्रियान्वितः प्रजावनं विधाय धीरमानितः
सयाजिभूपतिर्यथा शशास गौर्जरीमिलाम् ॥

प्रतापवान्सुबुद्धिमान्सुशीलवान्गुणोदधिः
पितामहेन शिक्षितः सुराज्यसूत्रधारकः ।
श्रिया युतस्तथा सुखं प्रशास्तु गौर्जरीं क्षितिं
प्रतापसिंहभूपतिः शतायुरस्तु वर्धताम् ॥

यद्वत्सयाजिराजः पुण्यश्लोकः स एव राजर्षिः ।
विद्यावदातचरितो विद्यादानव्रतोत्सुकस्त्वनिशम् ॥
वितरन्स्वान्तामोदं विमलीकुर्वन्महीं यशःकिरणैः ।
श्रीफत्तेसिंहसुतो गायकवाडान्वयाभ्रविमलेन्दुः ॥

राजा प्रतापसिंहः पैतामहव्रतपालनौत्सुक्यात् ।
भवतु प्रियः प्रजानां विनयाधानावनादिभिः सुतराम् ॥

सुराजराज्यलब्धतोषराजयः सुधीगणाः
सुखं वसन्तु सद्गुणादिभिः सदा प्रपन्नया ।
श्रिया नता भवन्तु शीलशालिनः प्रजागणाः
सुयोगलब्धिरीदृशी विना कृपां न चेशितुः ॥

PREFACE

The first volume of the Upaniśad Vākya Mahā-Kośa or a Concordance of Upaniśadic sentences is now presented to the Sanskrit knowing public. It will be interesting to note here the circumstances leading to the publication of this helpful but voluminous work.

While working as a Shastri in some leading printing houses of Bombay, I was entrusted by the Gujarati Printing Press to prepare an edition of the Bhagavad Gita with eleven commentaries, mostly unpublished. In making an attempt to trace the original sources of the quotations from the Upaniśads and the Puranas, I found Col. Jacob's concordance useful but not altogether satisfactory. This Concordance was compiled from forty-five Upaniśads only, and is therefore by no means exhaustive, and consequently a large number of citations could not be traced with the help of Col. Jacob's work.

In the eleven commentaries on the Bhagavad Gita citations are made not only from the 108 well known Upaniśads, but also from many others which are either not known or very insufficiently known. This naturally necessitated a patient search for further manuscripts in the archives of the manuscript libraries throughout the length and breadth of India.

The search which proved very successful showed the existence of no less than 223 Upaniśads. These Upaniśads were collected, and a list of sentences occuring in them was made out in an alphabetical order after a sustained labour of several years. It is hardly necessay to mention that this list proved very helpful in tracing the citations occuring in the eleven commentaries on Gita to their original sources. The edition of the Bhagavad Gita was ultimately published by the Gujarati Printing Press, Bombay.

By the time I finished the list of sentences in the 223 Upaniśads in my collection, the number of sentences had already gone beyond forty thousand. Lest this labour of years may go in vain if it be not printed and published, I decided at the advice of my friends and well wishers to print the book as quickly as possible. Being already 72 years of age I was afraid I may not live to see the completion of the work unless I could make things move very fast.

But one thing was wanting, and that was finance. The estimate for printing the book in two volumes came to about six thousand rupees. Six thousand rupees is a staggering sum for a poverty stricken Shastri like myself. Feeling helpless I started for my Patron Deity at Garudeshwar. There I was inspired to approaeh the noble Prince His Highness the Maharaja Pratap Sinh Gaekwar for patronage towards this expensive undertaking.

By the grace of God Anant, the Eternal, the help came, and I was granted half of the full cost of production, a sum of three thousand rupees without a

moment's hesitation. It is by the bounty of this generous ruler that the first volume of the Upaniśad Vākya Mahā-Kośa sees the light of the day, to the infinite pleasure of Sanskrit scholars all over the world and the humble author. Officers of the Baroda State like Dr. S. M. Pagar, Dr. B. Bhattacharyya, Dr. S. S. Bhave, actively sympathised with my work, and I record here my deep appreciation of what they have done to further the cause of Indian scholarship.

It will not be out of place to mention here a few details of the life of my chief patron, His Highness the Maharaja Pratap Sinh Gaekwar to whom generosity this work owes its origin, and to whom this work is dedicated as a token of profound gratitude.

× × ×

His Highness the Maharaja was born on the 29th June 1908 at the Motibag Palace in Baroda. He is the son of the late Prince Fateh Sinh Rao, and the grandson of the illustrious Maharaja the late Shri Sayaji Rao Gaekwar. In his early childhood, the young prince lost his parents, and it fell to the lot of his grandfather to replace them both and shoulder all responsibilities for the upbringing of the future king of Baroda.

The late Maharaja Sayaji Rao undertook this task with unparalleled thoroughness in order that the young prince may be well equipped and fitted for the great task of governing a first class State like Baroda.

The Prince's early education was supervised by a band of excellent Indian and European tutors, and his companions were carefully selected from the families of Sardars and officers of the State. He was sent for a time to the Rajkumar College at Rajkot, but was soon brought back to the Baroda High School to take his place as an ordinary school boy and to mix promiscuously with others over whom he was destined to rule.

After his matriculation, the Prince was given College education first at the Baroda College and then in the Deccan Callege, Poona. Finally the grandfather decided to send him out on a grand tour to Europe to see life at its various phases and gain experience of the world. During the whole tour the Prince led a simple, almost an ascetic life, and did not carry with him even the usual entourage. He worked for himself doing all kinds of odd jobs, even to the length of packing his own things. This tour made a lasting impression on his mind.

Almost immediately on his return he was introduced by his sagacious grandfather into the administration. As Yuvaraja he became the head of the Revenue Department. As experience grew he was given higher and higher importance and responsibility. While under training, he received continuous guidance and advice of able administrators such as Sir V. T. Krishnamachariar, Col. Kumar Shivaraj Singh, Mr. Ramlal H. Desai, Mr. R. S. Mane Patil and others. The Yuvaraja however made his own decisions and always accepted full responsibility for his actions.

Finally, the old Maharaja Sayaji Rao took the Yuvaraja as his own Private Secretary, when he attended such historic events as the Imperial Conference and the Coronation of His Majesty. This new and historic experience gave him wonderful insight into the various constitutional problems of India and his own State. The result of this great experience is already in the process of bearing fruit as is known to all by now.

Besides being an able administrator, the Maharaja is an excellent horseman and a keen Polo player. He takes an active interest in all forms of sports, physical training and hunting.

The new Maharaja is physically sturdy and strong. He is shrewd, observant, deep, thorough and self-reliant; he dislikes sycophancy and half truths. He has natural dignity and his manners are jovial and unassuming. Though quick in grasp and decision, he listens to all patiently and carefully. Endowed with a host of admirable qualities, His Highness the Maharaja Pratap Sinh Gaekwad is most fitted to succed to the noble heritage of his illustrious grandfather whose footsteps he is so scrupulous in following.

The new Maharaja ascended the throne on the 7th of February 1939, and within this short time, he has given ample proof of his future greatness. He gave away a crore of rupees for Village Uplift from his own privy purse, granted permanent remissions of land revenue, and invested his people with liberal constitutional reforms. May God bless the young Maharaja and grant him a long life, continuous fame, honour and prosperity.

× × ×

Besides the help received from His Highness the Maharaja Gaekwad, I have to acknowledge the financial assistance received from the University of Bombay. The authorities of this University granted a sum of Rs. 300/ in 1938 and Rs. 700/- in 1939 towards the cost of production. I am also thankful to the numerous professors, friends and well wishers for their continuous encouragement and sympathy shown in the publication of this work.

In conclusion, I offer this humble work to the lotus feet of Lord Shri Ananta Bhagawan who in his divine grace became instrumental in bringing to light this index of ancient Indian wisdom of the Upaniśads for the use of the inquisitive readers. HARI : OM TAT SAT

Bombay, Guru-purnima day
19th July, 1940.

Shastri Gajanan Shambhu Sadhle

प्रस्तावः ।

' म॒हान्तं॒ कोश॒मुदं॑चा॒ नि षि॑ञ्च॒ स्यन्दं॑न्तां कु॒ल्या विषि॑ताः पु॒रस्ता॑त् ।
घृ॒तेन॒ द्यावा॑पृथि॒वी व्यु॑न्धि सुप्रपा॒णं भ॑वत्व॒घ्न्याभ्यः॑ ॥ '*

[—ऋ. मं. ५।८३।८]

अस्त्येतत् समेषां सुरभारतीपरिशीलनबद्धादराणां विपश्चिद्वराणां सुविदितमेव यत् सर्वेऽपि भारतीया आचार्या दार्शनिकादयश्च स्वसिद्धान्तोपष्टम्भकतया तत्र तत्र श्रुतिशिरोवचनान्येव भूम्नोपन्यस्यन्तीति । सर्वेषां हि समयिनामपौरुषेयत्वेनानादिनिधनत्वेन चाभ्युपगता भगवती श्रुतिरेव चरमं परमं च प्रमाणम् । तत्रापि शरीरिणां गात्रेष्विव शिरोभागा एव सर्वतः समुत्कृष्यन्ते श्रुतीनामपि । अक्षय्या निधयः खल्वेतेऽनन्यलभ्यस्य भारतीयानां सविज्ञानस्य ज्ञानस्य । नैकोऽपि कोऽपि विद्यते चतुर्विधपुरुषार्थसाधनोपायेषु तथाविधो योऽमीभिरविमृष्टचर इति निर्देष्टुं शक्यः । एतेषु च रहस्यविद्यानां प्रतिपादनादुपनिषच्छब्देन व्यपदेशः । " उपेत्य नियमयुक्ताय साद्यते उपदिश्यत इत्युपनिषत् । उप-नि-पूर्वात् ' षद्लृ ' विशरणगत्यवसादनेषु (धा.पा.१.८५४) इत्यस्मात् सम्पदादित्वात् कर्मणि क्विप् । ' सदिरप्रतेः ' (पा. सू. ८.३.६६) इति षत्वम् । इति ह्युपनिषच्छब्दो निरुच्यते तेन रहस्यार्थस्योपनिषत्संज्ञत्वमुपपद्यते । अत एवार्थशास्त्रे कामशास्त्रे च रहस्यप्रयोगेष्वौपनिषदशब्दः प्रयुज्यते । तादर्थ्याच्च ग्रन्थोऽप्युपनिषदुच्यते । तथा च क्वचित् ' रसोपनिषत् ' ' कुचोपनिषत् ' इत्याद्यास्तत्तद्विषयप्रतिपादकग्रन्थानां संज्ञा अपि समुपलभ्यन्ते । परं निरुपाधिक उपनिषच्छब्दः सकलरहस्येभ्योऽपि रहस्यतमां ब्रह्मविद्यामेव मुख्यया वृत्त्याऽभिधत्ते, तत्प्रतिपादिकां च श्रुतिमेव भक्त्येति सर्वसम्प्रतिपन्नमिदम् ।

तथा चाहुः श्रीमद्भगवत्पादाचार्याः–' उपशब्दो हि सामीप्यमाह । तच्चासति सङ्कोचके प्रतीचि पर्यवस्यति । निशब्दश्च निश्चयार्थः । तस्मादैकात्म्य निश्चितम् । तद्विद्या सहेतुं संसारं सादयतीत्युपनिषदुच्यते ' (बृ. भा.)। यं मुमुक्षवो दृष्टानुश्रविकविषयवितृष्णाः सन्त उपनिषच्छब्दवाच्यं वक्ष्यमाणलक्षणां विद्यामुपसद्योपगम्य तन्निष्ठतया निश्चयेन शीलयन्ति तेषामविद्यादेः संसारबीजस्य विशरणात् हिंसनात् विनाशनादित्यनेनार्थयोगेन विद्योपनिषदित्युच्यते । पूर्वोक्तविशेषणान् मुमुक्षून् वा परं ब्रह्म गमयतीति ब्रह्मगमयितृत्वेन योगात् ब्रह्मविद्योपनिषत् । गर्भवासजन्मजराद्युपद्रववृन्दस्य लोकान्तरे पौनःपुन्येन प्रवृत्तस्यावसादयितृत्वेन शैथिल्यापादनेन धात्वर्थयोगादग्निविद्याऽप्युपनिषदित्युच्यते ॥

ननु–उपनिषच्छब्देनाध्येतारो ग्रन्थमप्यभिलपन्ति–उपनिषदमधीमहे–अध्यापयाम-इति च । एवम् , नैष दोषः; अविद्यादिसंसारहेतुविशरणादेः सदिधात्वर्थस्य ग्रन्थमात्रेऽसम्भवात्, विद्यायां च सम्भवात्; ग्रन्थस्यापि

---

* भौमस्यात्रेरार्षम् । स खल्वृषिरनेन मन्त्रेण सकलजगज्जन्मादिविधायकं करुणावरुणालयं भगवन्तं जगतः कल्याणमाशासानः प्रार्थयते—भो जगदीश्वर ! महान्तं कोशं इममुपनिषद्वाक्यमहाकोशम् , उदच उद्गमय, विद्वन्मान्यतापादनादिना समुन्नततमं कुरु । ' अचु गतौ ' (धा. पा. ८६३) लोट् । किञ्च निषिञ्च स्वकृपामृतधारया सर्वश्रेयोऽभिवर्षिण्याऽभिषिक्तं कुरु ॥ अनेन कर्मणा च कोशप्रणेतुः पितृणां पुरस्तात् अभिमुखं कुल्याः पयआदीनां नद्यः विषिताः अनवरुद्धाः स्यन्दन्ताम् , अस्य पितृणामक्षय्या तृप्तिरस्त्वित्यर्थः । तथा चाश्वलायनः—' यदृचोऽधीते पयसः कुल्या अस्य पितॄन् स्वधा उपक्षरन्ति यद्यजूंषि घृतस्य कुल्या, यत्सामानि मध्वः कुल्या, यदथर्वाङ्गिरसः सोमस्य कुल्या, यद्ब्राह्मणानि कल्पान् गाथान्तराशंसीरितिहासपुराणानीत्यमृतस्य कुल्याः ' (गृ. सू. ३. ३. ३.) इति ॥ घृतेन अमृतरसेन गव्येन च द्यावापृथिवी दिवं च पृथिवीं च व्युन्धि विशेषेण क्लेदय ' उन्दी क्लेदने ' (धा.पा.७.२०) लोट् । कोशकर्त्रे स्वर्लोकेऽमृतं भूलोके घृतं तत्सहकृतं पयोदध्यादि च प्रभूतमुपतिष्ठतु; स इहामुत्र सुखमृच्छत्विति भावः । तथा चात्र मन्त्रान्तरम्–'घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ।(ऋ.सं.४.५८.१इति, ' तस्मै सरस्वतीदुहे क्षीरं सर्पिर्मधूदकम् । ' (ऋ. सं. ९. ६७. ३२) इति चानुसन्धेयम् ॥ अघ्न्याभ्यो गोभ्यः सुप्रपाणं सम्यक्पातव्यमुदकं भवतु । काले वर्षतु पर्जन्यः । गोभ्यः शिवं स्वस्ति चास्त्वित्यर्थः ॥

तादर्थ्येन तच्छब्दत्वोपपत्तेः, 'आयुर्वै घृतम्' इत्यादिवत्। तस्मात् विद्यायां मुख्यया वृत्त्योपनिषच्छब्दो वर्तते, ग्रन्थे तु भक्त्या इति (कठभा.)। तैत्तिरीयोपनिषद्दीपिकायां सायणाचार्या अपि "अत्र ह्युपनिषच्छब्दो ब्रह्मविद्यैकगोचरः। तच्छब्दावयवार्थस्य विद्यायामेव सम्भवात्॥ उपोपसर्गः सामीप्ये तत्प्रतीचि समाप्यते। सामीप्यात्तारतम्यस्य विश्रान्तेः स्वात्मनीक्षणात्॥ त्रिविधः सदिधात्वर्थो विद्यायां सम्भविष्यति। श्रीमत्सुरेश्वराचार्यैर्विस्पष्टमिदमीरितम्॥ उपनीयेममात्मानं ब्रह्मापास्तद्वयं स्वतः। निहन्त्यविद्यां तज्जं च तस्मादुपनिषद्भवेत्॥ निहत्यानर्थमूलां स्वाविद्यां प्रत्यक्तया परम्। गमयत्यस्तसम्भेदमतो वोपनिषद्भवेत्॥ प्रवृत्तिहेतूंन्निःशेषांस्तन्मूलोच्छेदकत्वतः। यतोऽवसादयेद्विद्या तस्मादुपनिषन्मता" इति॥ 'यथोक्तविद्याहेतुत्वाद्ग्रन्थोऽपि तदभेदतः। भवेदुपनिषन्नामा लाङ्गलं जीवनं यथा॥' इति। ताश्चैता उपनिषदो गीर्वाणसारस्वतसरस्वति महार्घा मणय इवापरिमिता एव विद्योतन्ते। परमिदानीं बहूनां श्रुतिशाखानामुच्छिन्नत्वात्; विद्यमानानामप्यङ्गुलीमेयानामाशिरोऽन्तर्धायमानत्वात्, अन्यैश्च तैस्तैः कलिकालमात्रसुलभैर्वेदोच्छेदकरैरुपप्लवैर्विप्लुतत्वाच्चादरणीयतरा अपि, अनादिनिधनत्वेन प्रसिद्धा अपि, प्रायो दुष्प्रापदर्शना एवैता वाङ्मय्यो भगवतस्तनवः।

यद्यप्यद्यत्वे क्वचिदष्टाविंशतिः, कुहस्वित् द्वात्रिंशत्, कचनैकसप्ततिः, अन्यत्राष्टोत्तरं शतम्, इत्याद्यनेकत्रोपनिषदः प्रकाशिता दृश्यन्ते; तथापि ताः प्रायशोऽशुद्धिबाहुल्यासंविभक्तत्वासम्पूर्णत्वादिदुरन्तदोषग्रस्ततया न मनीषिणां मनोरथान् पूरयितुं पारयन्ति।

न च तावता सर्वासां संग्रहोऽपि भवति, तत्रानुपलभ्यमानानां भूयसां वचसां ग्रन्थकृद्भिरुदाहृतत्वेन तदधिकोपनिषत्सत्त्वानुमानात्। दृश्यन्ते च वैदेशिकेन 'फारकर' नाम्नाऽनेकग्रन्थपर्यालोचनादिना 'रिलिजिअस लिटरेचर ऑफ् इंडिया' इत्यत्र प्रकाशितायां सूच्यां त्रयोविंशत्यधिकशतसंख्यान्युपनिषन्नामानि। उपलभ्यन्ते च क्वचित् क्वचित् तद्व्यतिरिक्तान्यपि पुस्तकानीत्यावश्यकस्तत्संग्रहे प्रयत्नः।

किञ्च प्रकाशितानामप्यासामिदानीमध्ययनाभावेन तदसम्भवेन चाभीष्टवाक्यमन्त्रादीनां स्थानाभानदौस्थ्यं तदवस्थमेव। तेन अतर्कसाध्याध्यात्मविद्याविषयान् निबन्धान् प्रत्येकोपष्टम्भानि शारीरादिभाष्याणि, भामतीश्रुतप्रकाशिकादिव्याख्याः, अन्यांश्चैवंविधान् प्रबन्धानधीयानाः, द्वैताद्वैतादिदार्शनिकग्रन्थांस्तुलनयाऽभ्यस्यन्तः, विशेषतस्तादृशग्रन्थानां संशोधकाश्च तत्रोदाहृतोपनिषद्वाक्यसन्दर्भशुद्धिवञ्चितास्तत्त्वार्थावधारणे कियत् क्लिश्नन्तीति तथाविधा एव बुधा बुध्येरन्। ईदृश्युपनिषदां विषमावस्थैव केषांचन दुर्दुरूढानां परमाप्ततया प्रतीतैरप्याचार्यपादादिभिरुदाहृतेषु वाक्येष्वमूलत्वारोपणे, अपरेषां साहसिकशिरोमणीनां स्वकपोलकल्पितवचसामपि श्रुतित्वेन जल्पने चावसरं वितरतीति सर्वेषामेवास्तिकानामत्यावश्यकं तद्दूरीकरणम्। न च तत्र यावदुपलभ्यमानानामशेषाणामप्युपनिषदां संग्रह-संविभाग-संशोधनपूर्वकं प्रकाशनं; तदन्तर्गतनिखिलवाक्यानां वर्णानुक्रमानुसारिसूचीनिर्माणं चान्तराऽपरः कोऽप्युपाय इति सर्वसम्प्रतिपन्नम्। किंतु 'वक्तुं सुकरमेतत्, कर्तुं दुष्करम्' इति पश्यन्त अद्यावन्न केऽपि लब्धवर्णमणयोऽस्मिन् कर्मणि प्रावर्तिषत, परमिदानीं—मन्यामहे परिणाममुपेयुषां पण्डितानां पुण्यपुञ्जेन प्रेरितः—ता एता उपनिषदामौपनिषदानां चापद एकपद एवापाकर्तुं समनह्यत्संख्यावतामग्रेसरः श्रीमान् 'शम्भुसूनुर्गजाननशास्त्री साधले' महाभागः। व्यतानीच्च नातिचिरादिव भगवतः श्रुतिरक्षादीक्षितस्य क्षीरसागरसुताजानेरनुकम्पामात्रसहायः श्लाघनीयतमं बृहदुपनिषत्संग्रहमिममुपनिषद्वाक्यमहाकोशं चेति चिरायाधमर्णमस्य सकलमपि कृति कुलं जानीमः। वयसा स्थविरतरस्याप्यध्यवसायवता मनसा यूनोऽतिशयानस्य, धनेन दुर्गताग्रगण्यस्याप्यनवद्यया विद्यया लक्ष्मणस्य प्रापञ्चिकसुखवञ्चितस्यापि सदा स्वानन्दनिर्भरस्यास्य शास्त्रिमहोदयस्यात्र प्रवृत्तिवृत्तान्तस्य परिचयः 'न्यूनातिरिक्तं यत्किञ्चित्' इति तन्निवेदनतोऽवगन्तव्यः।

एवमतिमहता यत्नेन सम्भृता अपि ता उपनिषदः काश्चिदतिजरत्तरमातृकतया करग्रहणमपि सोढुमक्षमः काश्चिदसंविभक्तवाक्यतयार्थावबोधनेऽसमर्थाः, काश्चिदशुद्धजालजटिलतया पठनेऽप्यपर्याप्ताः, काश्चिच्च तैस्तैः

अनभिज्ञलिखितग्रन्थैकसुलभैर्दोषविशेषैराक्रान्ता अभूवन् । ताश्चात्रभवता शास्त्रिप्रवीरेण सूक्ष्मेक्षिकया संशोध्य यथोचितं संविभज्य, तच्छुद्धपाठानुन्नीय, यावद्बुद्धिबलं पूर्वोदितं दोषजालमपनीय, तथा संस्कृता यथा मुद्रणयन्त्राधिरोहणं प्रतीक्षमाणास्तिष्ठन्ति । अयं च तत्रत्यानां सर्वेषामेव वाक्यानामकारादिवर्णक्रमेण विहितः कोशस्तद्गुणपरिमलवाहः पृषदश्व इव तत्रभवतः सहृदयानुपतिष्ठत इति कथं वायं महात्मा शास्त्रिशिरोमणिः स्वपितृउद्धरणमात्रार्थमधिवसुधं समानीतसकललोकैकपावनसुरसरित्सलिलस्य नानुकरोतितरां भगीरथस्य ?

अथैवं सरस्वतीनिसर्गमात्सर्यशालिन्या लक्ष्म्या कदाचिदकटाक्षितेन, जठरपिठरपूरणाय व्यवसायान्तरं श्रितवता, स्वयशोराशिविशदपलिताक्रान्तशिरसा, यस्यां जाग्रति भूतानि तस्यामिव या निशा सर्वभूतानां तस्यामपि जाग्रता, शास्त्रिमहाशयेन भूयसः क्लेशाननुभूय निर्माय निर्मायमुपहृतमिममुपनिषद्वाक्यकुसुमकोशं स्वकरकिसलयैः स्वीकृत्याश्वेव सफलीकरिष्यन्त्येतस्य परिश्रमान् कोविदकल्पद्रुमा इत्याशास्महे ।

ये चात्र केचिद्दोषाः सम्भवेयुस्ते कर्तुरसहायतां च जराशिथिलतां च साधनसामग्रीविकलतां च तथाऽस्य कर्मणोऽपि विशालतां च विषमतां च मानुषमनीषाया अल्पविषयतां च समालोच्य मर्षणीयाः करुणार्णवैर्लब्ध-वर्णवरेण्यैरिति तान् साञ्जलिबन्धमभ्यर्थयामः ।

अन्ततश्च वयसेव विद्यया तयेव नयविनयाभ्यां ताभ्यामिव गुणैश्च गरिष्ठमपि सौजन्यातिशयेन सुहृदायमान-मीदृशानेककर्मसु व्यापृतं श्रीमन्तं शम्भुसूनुं गजाननशास्त्रिणमनामयेन द्राघीयसायुषा यशसा श्रिया च समेधयितुं भगवन्तमगजाननलिनभास्करं महेश्वरं सम्प्रार्थ्य तेन सपद्येवाविश्चिकीर्षितं 'बृहदुपनिषत्संग्रहं' प्रतीक्षमाणा एतावत्येव तिष्ठासामः ।

'दोषैर्द्विषन्तश्च गुणैर्महान्तस्तुष्यन्तु सन्तः सुखमस्मदीयैः ।
अन्तर्द्वयेषामपि सन्तमेषां जानीमहे प्रीतमनन्तमेकम् ॥'

महाशालिक्षेत्रम्
शके १८६२ वटपूर्णिमा

दीर्घदर्शिनामाश्रवः—
धूपकरोपाह्वोऽनन्तयज्ञेश्वरशर्मा ।

न्यूनातिरिक्तं यत्किञ्चित् ।

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥

अनन्तकोटिब्रह्माण्डनायकस्यानन्तभक्तजनाज्ञानान्धतमसविध्वंसकरस्यानन्तार्तार्तिहरस्य सच्चिदानन्दमय-स्यानन्तासनस्य भगवतः श्रीमदनन्तस्य कृपालवलेशात्स्वान्तःस्फुरितं तत्प्रसादभूतं श्रुतिमनोनयनाह्लादकरं कमनीयकमलकोशमिवेममुपनिषद्वाक्यमहाकोशं विद्वद्वरकरकमलेषूपहारीकर्तुं मम मनोभास्करोऽद्यानन्तानन्दो-दयाचलं समुदितस्तत्प्रमोदसन्दोहावहमिति को न मन्येत ?

श्रीमद्विद्वद्रमेसरैः परोपकृतिमद्भुर्यैर्धूपकरेत्युपाख्यैरनन्तशास्त्रिभिः स्वोद्यमभारं दूरतोऽपसार्यास्योपनिष-द्वाक्यमहाकोशस्य प्रस्तावलेखनेनोपकृतोऽहं प्रभाकरप्रभया खद्योत इव लेखनासमर्थोऽपि तदनुज्ञया तच्छन्दैरेव किञ्चिल्लेखनधाष्टर्यं कर्तुमुद्युक्तः स्वोद्देश्यादि स्फुटीकर्तुम्, तत्क्षमापयितुमर्हन्ति ते क्षमाशीलाः ।

उपनिषद्वाक्यमहाकोशस्य प्रादुर्भावः परिचयश्च ।

नव वा दश वर्षाणि व्यतीतानि भवेयुस्तत्प्रागेव 'गुजराती' मुद्रणालयाधिपतिभिर्मामाहूयोक्तं 'शाङ्कर-भाष्याद्येकादशटीकोपेता श्रीमद्भगवद्गीता मुद्र्यतेऽस्माभिः । परं च तद्भाष्य-व्याख्यादि-प्रणेतृभिस्तत्र तत्र स्वस्वमतसमर्थनपराणि वेदवेदाङ्गश्रुतिस्मृतिपुराणेतिहासादिभ्यो यानि वाक्यानि समुद्धृतानि भवेयुस्तेषां मूलस्थलाङ्कनिवेशनेन तत्तदादर्शभूतप्रत्यन्तरादिभ्योऽशुद्धिनिरसनपूर्वकं विशेषाविशेषनिदर्शनेन च परिच्छेद-स्वल्पास्वल्पविरामचिह्नैश्च तां विभूष्य सा मुद्रणीयेत्यस्माकं मनस्युत्कटा मनीषा समुद्भूता तां सफलीकर्तुमर्हथ' इति । तथेत्युक्त्वा तत्कर्तुमुद्युक्तोऽहं श्रीमद्भगवद्गीतायास्तत्तट्टीकाकारैस्तत्र तत्र वेदादिग्रन्थेभ्यः समुद्धृत-

वाक्यानां स्थलनिदर्शनेन न तथा परिश्रान्तोऽस्मि यथोपनिषद्वाक्यस्थलाङ्कनिदर्शनेन। एवमस्मिन्नारब्धकार्ये मासद्वयावध्यगाधचिन्ताम्बुधेरतितरतरलतरङ्गनिकरेषु निमग्नमानसोऽभूवम्।

तत एकस्मिन्दिने नयननाराचवसुविधुतमे (१८५२) शकाब्देऽनन्तप्रियायामनन्तचतुर्दश्यां कृतानन्तार्चनोपासनस्य "को मम चिन्ताग्रहग्रस्तस्य हस्तावलम्बदानेनास्मात्समुद्धर्ता भविता ? 'अनन्तसंसारमहासमुद्रमग्नं समभ्युद्धर वासुदेव !। अनन्तरूपे विनियोजयस्व ह्यनन्तसूत्राय नमो नमस्ते ॥' इत्यनन्तभक्तैरनन्तस्तवैः स्तुतोपासितानन्तगुरो 'त्वमेवेदानीं ममाप्यनन्तापत्समुद्धर्ता गुरुः शरणं भव' इति प्रार्थयमानस्यार्धरात्रेऽर्धसुप्तस्यापि मम मनसि श्रीमदनन्तानुग्रहतश्चिन्तापद्मनध्वान्तविध्वंसकोऽयं चिन्तामणिः प्रादुरभूद्यदहमेवोपनिषद्वाक्यकोशस्य सम्यक्प्रणयनं कुर्यां तर्हि मदीयमप्यारब्धकार्यं सफलं भवेल्लोकसंग्रहश्चापीति। ततस्तदैवोत्थाय कृतानन्तानन्तप्रणामोऽहं मुद्रिताष्टोत्तरशतोपनिषद्गतामीशावास्योपनिषदमारभ्योपनिषद्वाक्यमहाकोशहेतोस्तद्वाक्यावलीलेखनं विधातुमुद्युक्तः।

चतुःपञ्चोपनिषदां वाक्यलेखनानन्तरं लिखितेषु वाक्येष्वपशब्दितं गलितादि च दृष्ट्वा तद्दूरीकर्तुमनसा पितृपितामहादिसंग्रहीतग्रन्थेषु विचिन्वता मयाऽतिजीर्णं हस्तलिखितं भ्रष्टाक्षरमष्टोत्तरशतोपनिषद्भिन्नमुपनिषद्द्वयं समुपलब्धम्। तदवलोक्य 'एतदतिरिक्ता अन्या अप्युपनिषदोऽत्र मुम्बापुरस्थबृहत्पुस्तकालयेऽन्यत्र च स्युः' इत्याशाङ्कुरो मद्धृदाकाशेऽङ्कुरितः। परन्तु तल्लाभः प्रयत्नापेक्षः, प्रयत्नस्तु शक्त्यवसरद्रव्यापेक्षः, तद्धीनेनापि यथाशक्ति शनैः शनैः प्रयतितं मया। 'प्रसादचिह्नानि पुरःफलानि' (र. वं. २।२२) इति श्रीमन्महाकविकुलगुरोः कालिदासस्योक्तिस्तत्प्रसङ्गानुसारेण सूपयुक्तैव, तथापि 'प्रयत्नचिह्नानि पुरःफलानि' इत्यपि केनचित्कविवरेण यत्रकुत्रचिदुक्तं स्याच्चेत्तदपि युक्ततरमेवेत्यहं मन्ये, मत्कृतप्रयत्नाम्बुधारासिञ्चनेन मदाशांकुरस्य महावृक्षीभूतत्वात्। तासामत्यन्तायासलब्धानामुपनिषदां परिसङ्ख्यानं विंशोत्तरशतद्वयात्मकमभूद्यासामयमुपनिषद्वाक्यमहाकोशः समजनि, तत्प्रेक्षासमकालमेव प्रेक्षावतां विद्वद्वराणामामोदातिभूमिमारोहेदेवासंशयम्। तद्गतं पुरुषसूक्तं ऋग्यजुरादिवेदान्तर्गतमप्युपनिषदेवेति निर्विवादं निश्चितं मत्वा तद्वाक्यैरयं कोशः समलङ्कृतोऽस्माभिः "पुरा मत्पुत्र ! पुरुषसूक्तोपनिषद्रहस्यप्रकारं निरतिशयाकारावलंबिना विराट्पुरुषेणोपदिष्टं रहस्यं ते विविच्योच्यते" इति नारदपरिव्राजकोपनिषदि (उप. २) ब्रह्मणा नारदायोक्तत्वात्। तथैव "त्रिसुपर्णोनिषदः पठनात् पंक्तिपावनः... त्रिसुपर्णश्रुतिर्ह्येषा निष्कृतौ त्रिदले रता" इति द्वितीयबिल्वोपनिषदि दृष्टत्वात्तद्वाक्यैरप्ययं विभूषित इति ज्ञातव्यं विचक्षणैः। अस्मत्सङ्कलितबृहदुपनिषत्संग्रहे सश्रीसूक्त एत आलोचयतामालोचनगते भविष्यत एवेति।

अत्र केचिद्वदन्ति–' उपनिषदस्तु दशैव त्रयोदश वा, या अबोधशब्दसुबोधाय श्रीमच्छङ्कराचार्यवर्यैः प्रायशः शब्दशो व्याख्याताः, यदीतरास्तत्कालीना भवेयुस्तर्हि ता अपि कथं न तद्व्याख्याविभूषिता दृग्गोचरतामायान्ति?' इति। तदसत्। श्रीमच्छङ्करानन्द-नारायण-रामतीर्थादि-यतिवरैश्चत्वारिंशदधिकानामथर्वशिखाद्युपनिषदां कृतानि व्याख्यानानि दृश्यन्ते। तत्र श्रीमद्यतिवर-नारायणस्वामिपादैस्तु प्रत्युपनिषद्व्याख्यानस्यादावन्ते च 'नारायणेन रचिता श्रुतिमात्रोपजीविना' इत्यनेन पद्येन स्वीयाचारकृतयः श्रुतिपराः समर्थिताश्च दृश्यन्ते। अत ईशावास्यादित्रयोदशोपनिषदामिव तदितरासां श्रुतिमयत्वसिद्धेर्दर्शनात्॥ ॥ केचिद्वैयाकरणाचार्या नैयायिकादयश्च लिखितकतिपयोपनिषद्गतमपशब्दितं ह्रस्वदीर्घादिकं च लेखकप्रमादोद्भूतं स्यादिति जानन्तोऽपि नाङ्गीकुर्वन्ति तत्समीकर्तुं, कथयन्ति च यथादृष्टश्रुतमेव मुद्रणीयं, न वयं तत्र हस्तप्रक्षेपं कर्तुं शक्नुम इति। तथापि मया लेखकप्रमादोद्भूतो हस्तदोषोऽयमिति निश्चित्यादिमान्तिमसम्बन्धमनतिक्रम्य तद्गतामशुद्धिप्रचुरतां यथामति दूरीकृत्य तद्वाक्यान्यत्र समावेशितानि। आस्तां तावत्, प्रकृतमनुसरामः।

अत्रोल्लिखितानामुपनिषदां प्राचीनार्वाचीनत्वं, तद्व्याख्यातॄणां परिचयः, उपनिषद्गतास्फुटशब्दार्थपरिज्ञानं, अनेकार्थात्मादिशब्दा यत्र यत्रोपयुक्तत्वेनोपनिषत्सु दृग्गोचरा भवन्ति तेषां स्थलनिर्देशः, उपनिषदुपलब्धिस्थानादि चैतद्विषयाणामत्रोल्लेखनमावश्यकमपि तद्यथावसरं यथामत्यस्योत्तरार्धे विद्वदग्रेसराणामग्रे निधापयिष्यामः, उत्तरार्धस्याप्यविलम्बिततया मुद्रणावश्यकत्वात्। बृहदुपनिषत्संग्रहेण साकमचिरादेव तत्सर्वं प्रकाशीभविष्यत्येव।

आदिमपाठ्यविषयाः ।

एतदुपनिषत्कोशोपयुक्ताजिज्ञासुभिः संस्कृतसारस्वतोपासकैः पण्डितवर्यैः शास्त्रि-पौराणिक-प्रवचनकर्त्रादिभिश्च प्रथमं ज्ञातृज्ञेयज्ञानात्मानात्मात्मीय-चिच्चित्तचिन्तनीय-ध्यातृध्येयध्यान-त्वमहमादिशब्दारम्भितवाक्यानि शुद्ध-सत्त्वान्तःकरणेन प्रविचार्यास्योपयोगिता निर्धार्या ।

१–अत्र सर्वाणि वाक्यान्यकारादिवर्णक्रमेणैव लिखितानि; किन्तु ‘ओङ्कारं प्रथमं कृत्वा ततो ब्रह्म प्रवर्तयेत् । अन्यथा विपरीतं तद्ब्रह्म स्यान्नात्र संशयः (प्रयोगपारिजाते यमः) इति धर्मशास्त्रानुशासनात्, श्रुत्यध्ययनस्य सर्वत्रोङ्कारपूर्वकत्वात्, उपनिषदामपि श्रुतिविशेषत्वाच्च प्रणवादीनि वाक्यानि प्रथमं निवेश्य ततोऽकारादि-क्रम आदृतः । २–(?) ईदृक् चिह्नादिमद्वाक्यं ‘जेकब्’ महोदयकृतोपनिषच्छब्दकोशादुपात्तम् । एवंविधानि वाक्यानि च ‘घ’ वर्णादिवाक्यपर्यन्तमेव संगृहीतानि । ३– +इति चिह्नं प्रकृतस्य वाक्यस्यान्यत्रापि निर्दिश्य-मानस्थलेऽवस्थानसूचकम् । ४– एतच्चिह्नमुपात्तवाक्यस्य तस्यामेवोपनिषदि निर्दिष्टस्थानेष्वाम्रेडनबोधकम् । ५ –...इदं विस्तारभयात् त्यक्तानां शब्दानां सूचकम् । ६–अत्र कचित् पदच्छेदः पङ्क्त्यायतिपरिजिहीर्षया न विहितः । ७–दूरान्वयवन्ति द्राघिष्ठानि च वाक्यानि– यथाऽऽचार्यैरुदाह्रियन्ते तथा– द्विधा त्रिधा वा कृत्वाऽत्र निवेशितानि । समग्राण्यपि च तानि तत्तदादिवर्णानुसारेण सङ्गृहीतान्येवेति न कैश्चनात्र विप्रति-पत्तव्यम् । ८–वाक्यारम्भप्रधानपदाद्यवर्णमनुरुध्यैव तन्निवेशनं विधाय, तदारम्भगतानि ‘अथ– अतः–खलु’ प्रभृतीनि पदानि कुत्रचित् ( ) ईदृक् चिह्नान्तरे लिखितानि । ९–अत्र निर्दिष्टाः खण्डाध्यायाद्यङ्काश्च प्रकाश्य-मानं बृहदुपनिषत्संग्रहमनुसरन्ति । १०–उपनिषदां नामादिसङ्केताश्च सुव्यक्तत्वात् कोशानुशीलनावसर एव बुध्येरन् । ११ मुद्रितामुद्रितोपनिषत्सु कियन्त्यो निरङ्का अपि सन्ति ता यथावसरं यथामति च साङ्काः कृत्वैव तत्तदुपनिषद्वाक्यमत्र लिखितम्, यतस्तद्वाक्योपलब्धिः सुकरा स्यात्तथा यतितमिति वाचकदृक्पथं यास्यत्येव ।

उपनिषद्वाक्यकोशस्यास्य प्रणयनं केन प्रकारेण कथं जातं तदादावेव निर्दिष्टम् । तत्कार्यसमारम्भे प्रसिद्धा-प्रसिद्धा (मुद्रितामुद्रिताः) उपनिषन्मूलभाष्यादिग्रन्था इतस्ततो य उपलब्धास्ते सर्वेऽद्वैतपन्थीयानामेव । ततोऽस्याखिलसाम्प्रदायिनामप्युपयुक्ततासिद्धिं चिकीर्षुणा मया तत्तत्साम्प्रदाय्युपनिषद्ग्रंथा बहुत्रान्वेषितास्तदा केवलं माध्वापरपर्यायिद्वैतपन्थीयाः सभाष्येशावास्यादयो दशोपनिषदः समासादिताः । तदन्तर्गताः पाठभेदा-स्तन्मूलत एवात्र सङ्कलिताः; माध्वभाष्यस्य गद्यपद्यात्मकत्वात्; पद्यात्मके भाष्ये पाठान्तरव्याकृतेरसंभवाच्च । विशिष्टाद्वैतपन्थीयास्ताः सभाष्याः कुत्रचिन्मुद्रिता इति केवलं शुश्रुमः । शुद्धाद्वैतीयानां पुष्टिमार्गीयाणां तु दशोपनिषत्पाठान्तराणि सन्तीति किंवदन्त्याकर्ण्यते, कुत्रचिद्दृष्टान्यपि मया तद्ग्रन्थेषु, परंतु तदाप्तिः सुदुर्लभैव । तथापि यदि तानि मद्भागधेयवशाद्धस्तगतानि भवेयुः, यथोचितस्थलदानेन चात्र विभूषितानि भवेयुस्तर्हि कृतार्थो भवेयम् ।

अन्ततश्च “ यैः सङ्कलितसकलसकलविद्यैर्विद्याभिलाषिभिर्विद्याधनदानशौण्डैः श्रीमत्फत्तेसिंहसुतैः प्रतापसिंह-महाराजैर्जराजर्जरितस्य दशैकादशहायनैः कृताखण्डितायासस्य कल्पवृक्षेणेव स्वच्छायाश्रितस्य तवेप्सिततमं पूरयित्वा स्वत्प्रणीत उपनिषद्वाक्यमहाकोशोऽङ्गीकृतः, तेषां कीर्तिकीर्तने सगुणगणधन्यवाददाने च कथं त्वं दशदिक्प्रसारिततद्यशोभास्करकरैश्चकितचित्तश्चलद्धस्तो जरठः समर्थो भवितुमिच्छसि ” इति मम मानसं मां हसति, उपदिशति च मूलसिञ्चनेन वृक्षाग्रं यथोल्लसति सफलीभवति च तथा त्वमपि यैः साधनभूतैर्महाराजः प्रसादितस्तांश्चरणीभव ” इति । अतस्तानेव सौजन्यशालिनः परोपकृतिपरांस्तत्तदधिकाराधिकृतान् धन्यवादार्हान् रा. रा. शं. म. पगारोपाभिधानान्, ‘डॉ. लेले’ इत्युपाख्यान् डॉ. भट्टाचार्यान्, प्रो. श्री. स. ‘भावे’ इत्युपाह्वान्, वि. पा. ‘नेने’ इत्याख्यांश्चाहं तत्कृतोपकारस्मरणे नम्रीभूतः सादरं सप्रेम च संस्तूय निवेदयामि तत्तदुपकारजातातिमहत्यनुकम्पा नहि शक्या कदापि विस्मर्तुमित्यलमतिपल्लवितेन ।

प्राज्ञपादपांसुः—

साधले इत्युपाख्यो शंभुसूनुर्गजाननः

उपनिषन्नामादिसूची।

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१ अक्षमालोपनिषत्	अ. मा.	वाक्यात्मकः मन्त्रात्मकश्च		
२ अक्ष्युपनिषत्	अक्ष्युप. अक्ष्यु.	*वाक्यात्मकः *पद्यात्मकश्च		
३ अथर्वशिखोपनिषत्	अ.शिखो.,अ.शि.	वाक्यात्मकः		
० अथर्ववेदसंहिता	अथर्व.,अथर्व.सं.	कांडात्मकः		
४ अथर्वशिरउपनिषत् (शिवोप. रुद्रोप.)	अ. शिरः.	खंडात्मकः	वाक्यात्मकः मन्त्रात्मकश्च	
५ अद्वयतारकोपनिषत्	अद्वयता.,अ.ता.	वाक्यात्मकः पद्यात्मकश्च		
६ अद्वैतप्रकरणम् (मांडू.)	अद्वैत.	पद्यात्मकः		
७ अद्वैतोपनिषत्	अद्वैतो.	वाक्यात्मकः		
८ अद्वैतभावनोपनिषत्	अद्वैत.भा.	वाक्यात्मकः		
९ अध्यात्मोपनिषत्	अध्यात्मो.	वाक्यात्मकः पद्यात्मकश्च		
१० अनुभवसारोपनिषत्	अनु. सा.	वाक्यात्मकः पद्यात्मकश्च		
११ अन्नपूर्णोपनिषत्	अ. पू.	अध्यायात्मकः	पद्यात्मकः	
१२ अमनस्कोपनिषत्	अमन.	अध्यायात्मकः	पद्यात्मकः	
१३ अमृतनादोपनिषत्	अमृतना.,अ.नादो.	पद्यात्मकः		
१४ अरुणोपनिषत्	अरुणो.	मन्त्रात्मकः		
१५ अलातशान्तिप्र. (माण्डूक्योपनिषत्कारिकाः)	अ. शां.	पद्यात्मकः		
१६—१ अवधूतोपनिषत्	१ अवधू.	वाक्यात्मकः पद्यात्मकश्च		
१७—२ अवधूतोपनिषत	२ अवधू.	पद्यात्मकः		

* गद्यं पद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधैः। वर्णमात्रप्रभेदेन पद्यं बहुविधं स्मृतम् ॥ पद्यं चतुष्पदी, तच्च वृत्तं जातिरिति द्विधा। वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥ वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः। वाक्योच्चयो महावाक्यमित्थं वाक्यं द्विधा मतम् ॥ स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया। वाक्यानामेकवाक्यत्वं पुनः सम्भूय जायते ॥ ॥ वह्निपुराणे— प्राप्यते ज्ञानकथनं परलोकसुभाषितम्। स्वर्गापवर्गसिद्ध्यर्थं भाषितं यत्सुशोभनम ॥ वाक्यं मुनिवरैः शान्तैस्तद्विज्ञेयं सुभाषितम् ॥ रागद्वेषानृतक्रोधकामतृष्णानुसारि यत् ॥ वाक्यं निरयहेतुत्वात्तदभाषितमुच्यते ॥ संस्कृतेनापि किं तेन मृदुना ललितेन वा ॥ अविद्यारागवाक्येन संसारक्लेशहेतुना ॥ यच्छ्रुत्वा जायते पुण्यं रागादीनां च संक्षयः। निरुद्धमपि तद्वाक्यं विज्ञग्रमतिशोभनम् ॥ [इति श. चि. कोशः]

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१८ अव्यक्तोपनिषत्	अव्यक्तो.	वाक्यात्मकः		
१९ आगमप्रकरणम् (मांडूक्योपनिषत्कारिकाः)	आगम.	पद्यात्मकः		
२० आचमनोपनिषत् (आचमनीयो.)	आचम.	वाक्यात्मकः		
२१ आत्मपूजोपनिषत्	आ. पू.	वाक्यात्मकः		
२२ आत्मप्रबोधोपनिषत् (आत्मबोधो.)	आत्मप्र.	वाक्यात्मकः पद्यात्मकश्च		
२३–१ आत्मोपनिषत्	१ आत्मोप.	वाक्यात्मकः		
२४–२ ,,	२ आत्मो.	पद्यात्मकः		
२५ आथर्वणद्वितीयोपनिषत्	आथ. द्वि. आथर्व. द्वि.	वाक्यात्मकः मंत्रात्मकश्च		
० आपस्तम्बश्रौतसूत्रम्	आप. श्रौ.सू.			
२६ आयुर्वेदोपनिषत्	आयुर्वे.	पद्यात्मकः		
२७ आरुणिकोपनिषत् (आरुणेय्युप.)	आरुणि.,आरु.	वाक्यात्मकः		
२८ आर्षेयोपनिषत्	आर्षे.,आर्षेयो.	खण्डात्मकः	वाक्यात्मकः	
२९ आश्रमोपनिषत्	आश्रमो.	वाक्यात्मकः		
३० इतिहासोपनिषत्	इतिहा.	वाक्यात्मकः पद्यात्मकश्च		
३१ ईशावास्योपनिषत्	ईशावा.,ईशा.	मंत्रात्मकः		
३२ उपनिषत्स्तुतिः	[शिवरहस्यान्तर्गताऽद्याप्यलब्धा.	अध्या. ५४]		
३३ ऊर्ध्वपुण्ड्रोपनिषत्	ऊर्ध्वपु. ऊर्ध्वपुं,ऊ.पुं.	वाक्यात्मकः पद्यात्मकश्च		
० ऋग्वेदसंहिता	ऋक्सं.,	अष्टकात्मकः	अध्यायात्मकः	वर्गात्मकः
अष्टकात्मिका	ऋ. अ.	,,	,,	,,
मंडलात्मिका	ऋ.मं.	मण्डलात्मकश्च	सूक्तात्मकः	मंत्रात्मकः
० ऋग्वेदखिल.	ऋ.खि.श्री.सू.	मंत्रात्मकः		
३४ एकाक्षरोपनिषत्	एकाक्ष.ए.उ.	पद्यात्मकः		
३५–१ ऐतरेयोपनिषत्	१ ऐत.	अध्यायात्मकः	खण्डात्मकः	वाक्यात्मकः
३६–२ ,, (आत्मषट्को.)	२ ऐत.	खण्डात्मकः	वाक्यात्मकः	
३७–३ ,,	३ ऐत.	अध्यायात्मकः	खंडात्मकः	वाक्यात्मकः
३८ कठरुद्रोपनिषत् (कण्ठो.)	कठरु.	वाक्यात्मकः पद्यात्मकश्च		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
३९ कठोपनिषत्	कठो.	वाक्यात्मकः	पद्यात्मकः	
४० कठश्रुत्युपनिषत्	कठश्र.	वाक्यात्मकः		
४१ कलिसन्तरणोपनिषत् (हरिनामोप.)	कलिसं.	वाक्यात्मकः पद्यात्मकश्च		
४२ कात्यायनोपनिषत्	कात्याय.	वाक्यात्मकः		
४३ कामराजकीलितो. द्धारोपनिषत्	कामरा. कामराज.	वाक्यात्मकः		
४४ कालाग्निरुद्रोपनिषत्	कालाग्नि., का.रु.	वाक्यात्मकः		
४५ कालिकोपनिषत्	कालिको.	वाक्यात्मकः पद्यात्मकश्च		
४६ कालीमेधादीक्षितोप.	का.मे.दी., का.मे.	वाक्यात्मकः		
४७ कुण्डिकोपनिषत्	कुण्डि. कुंडि. कुंडिको.	पद्यात्मकः वाक्यात्मकश्च		
४८ कृष्णोपनिषत्	कृष्णो.	वाक्यात्मकः पद्यात्मकश्च		
४९ केनोपनिषत्	केनो.	खण्डात्मकः	पद्यात्मकः वाक्यात्मकश्च	
५० कैवल्योपनिषत्	कैव.	खण्डात्मकः	पद्यात्मकः	
५१ कौलोपनिषत्	कौलो., कौलोप.	वाक्यात्मकः		
५२ कौषीतकिब्राह्मणोप.	कौ.उ., कौ.त.	अध्यायात्मकः	वाक्यात्मकः	
५३ क्षुरिकोपनिषत्	क्षुरिको.	पद्यात्मकः		
५४ गणपत्यथर्वशीर्षोपनिषत्	गणप.	वाक्यात्मकः		
५५ गणेशपूर्वतापिन्युपनिष. (वरदपूर्वतापिन्यु.)	ग. पू.	उपनिषदात्मकः	वाक्यात्मकः	
५६ गणेशोत्तरतापिन्यु. (वरदोत्तरतापिन्यु.)	ग. शो.	उपनिषदात्मकः	वाक्यात्मकः	
५७ गर्भोपनिषत्	गर्भो.	वाक्यात्मकः		
५८ गान्धर्वोपनिषत्	गान्धर्वो.	वाक्यात्मकः		
५९ गायत्र्युपनिषत्	गायत्र्यु.	वाक्यात्मकः		
६० गायत्रीरहस्योपनिषत्	गायत्रीर.	वाक्यात्मकः		
६१ गारुडोपनिषत्	गारुडो.	पद्यात्मकः मंत्रात्मकश्च		
६२ गुह्यकाल्युपनिषत्	गुह्यका.	पद्यात्मकः		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
६३ गुह्यषोढान्यासोपनिषत्	गुह्यषो.,गु.षो.	वाक्यात्मकः		
६४ गोपालपूर्वतापिन्युपनिषत्	गो. पू.	गद्यपद्यात्मकः		
६५ गोपालोत्तरतापिन्यु.	गोपालो.	खण्डात्मकः	गद्यपद्यात्मकः	
६६ गोपीचन्दनोपनिषत्	गोपीचं.	वाक्यात्मकः पद्यात्मकश्च		
६७ चतुर्वेदोपनिषत्	चतुर्वे.	वाक्यात्मकः पद्यात्मकश्च		
६८ चाक्षुषोपनिषत्	चाक्षुषो.	मंत्रात्मकः		
(चक्षुरुप., चक्षूरोगोप., नेत्रोपनिषदिति नामान्तराणि.)				
६९ चित्त्युपनि.	चित्त्यु.	खण्डात्मकः	वाक्यात्मकः	
७० छागलेयोपनि.	छाग., छागले.	खण्डात्मकः	वाक्यात्मकः	
७१ छान्दोग्योपनिषत्	छांदो., छान्दो., छां. उ., छां.	अध्यायात्मकः	खण्डात्मकः	वाक्यात्मकः
७२ जाबालदर्शनोपनिषत्	जा. द.	खण्डात्मकः	पद्यात्मकः	
७३ जाबालोपनिषत्	जाबालो.जाबा.,	वाक्यात्मकः		
७४ जाबाल्युपनिषत्	जाबाल्यु.	वाक्यात्मकः		
७५ तारसारोपनिषत्	तारसा.	गद्यपद्यात्मकः मंत्रात्मकश्च		
७६ तारोपानिषत्	तारोप.	वाक्यात्मकः		
७७ तुरीयातीतोपनिषत्	तुरीया.	वाक्यात्मकः		
७८ तुरीयोपनिषत्	तुरीयो.	वाक्यात्मकः		
७९ तुलस्युपनिषत्	तुलस्यु.	गद्यपद्यात्मकश्च		
० तैत्तिरीयमारण्यकं	तै. आ.	मंत्रात्मकः		
८० तेजोबिन्दूपनिषत्	ते. बिं.	अध्यायात्मकः	पद्यात्मकः	
० तैत्तिरीयसंहिता	तै. सं.			
८१ तैत्तिरीयोपनिषत्	तैत्ति.+	वाक्यात्मकः	अनुवाकात्मकः मंत्रात्मकश्च	वाक्यात्मकः
८२ त्रिपाद्विभूतिमहानारायणोपनिषत्	त्रि. म. ना., त्रि. म.	अध्यायात्मकः	वाक्यात्मकः	
८३ त्रिपुरातापिन्युपनि.	त्रि. ता.	उपनिषदात्मकः	मंत्रात्मकः वाक्यात्मकश्च	
८४ त्रिपुरोपनिषत्	त्रिपुरो.	मंत्रात्मकः		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांक
८५ त्रिपुरामहोपनिषत्	त्रि.म.,त्रि,महो.,	मंत्रात्मकः		
८६ त्रिशिखिब्राह्मणोपनि.	त्रि. ब्रा.	खंडात्मकः	वाक्यात्मकः पद्यात्मकश्च	
८७ त्रिसुपर्णोपनिषत्	त्रिसुप.	मंत्रात्मकः		
८८ दक्षिणामूर्त्युपनिषत्	द. मू.	वाक्यात्मकः		
८९ दत्तात्रेयोपनिषत्	दत्तात्रे.	खण्डात्मकः	वाक्यात्मकः	
९० दत्तोपनिषत्	(अशुद्धप्रचुरा)			
९१ दुर्वासोपनिषत्	दुर्वासो.	पद्यात्मकः		
९२ १देव्युपनिषत्	देव्यु.	मंत्रात्मकः पद्यात्मकश्च		
९३ २ ,,	[शिवरहस्यान्तर्गताऽप्यद्याप्यलब्धा. अ. ९९]			
९४ द्वयोपनिषत्	द्वयो.	वाक्यात्मकः पद्यात्मकश्च		
९५ ध्यानबिन्दूपनिषत्	ध्या. बिं.	पद्यात्मकः		
९६ नादबिन्दूपनिषत्	ना. बिं.	पद्यात्मकः		
९७ नारदपरिव्राजकोपनि.	ना. प.	उपदेशात्मकः	वाक्यात्मकः पद्यात्मकश्च	
९८ नारदोपनिषत्	नारदो.	वाक्यात्मकः		
९९ नारायणपूर्वतापिन्यु.	ना. पू. ता.	खण्डात्मकः	वाक्यात्मकः	
१०० नारायणोत्तरतापिन्यु.	ना. उ. ता.	खण्डात्मकः	वाक्यात्मकः	
१०१ नारायणोपनिषत् (नारायणाथर्वशीर्षोप.)	नारा.	वाक्यात्मकः		
१०२ निरालम्बोपनिषत्	निरा.,निरा.उ. निरा. लं.	वाक्यात्मकः		
१०३ निरुक्तोपनिषत्	निरुक्तो.	अध्यायात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१०४ निर्वाणोपनिषत्	निर्वाणो.	वाक्यात्मकः		
१०५ नीलरुद्रोपनिषत्	नीलरु.	खण्डात्मकः	मंत्रात्मकः	
१०६ नृसिंहपूर्वतापिन्युपनि.	नृ. पू.	उपनिषदात्मकः	वाक्यात्मकः	
१०७ नृसिंहषट्चक्रोपनिषत्	नृ. षट्च.	वाक्यात्मकः		
१०८ नृसिंहोत्तरतापिन्युपनि.	नृसिंहो.	खण्डात्मकः	वाक्यात्मकः	
१०९ पञ्चब्रह्मोपनिषत्	पञ्चब्र., पं. ब्र.	वाक्यात्मकः पद्यात्मकः		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
११० परब्रह्मोपनिषत्	परब्र.	वाक्यपद्यात्मकः		
१११ परमहंसपरिव्राजकोप.	प. हं. प.	वाक्यात्मकः		
११२ परमहंसोपनिषत्	प.हंसो.,प.हं.	वाक्यात्मकः		
११३ पारमात्मिकोपनि.	पारमा.	अनुवाकात्मकः	मंत्रात्मकः	
० पारस्करगृह्यसूत्रम्	पा. गृ. सू.			
११४ पारायणोपनिषत्	पारायणो.	मंत्रात्मकः		
११५ पाशुपतब्रह्मोपानिषत्	पा. ब्र.	वाक्यात्मकः पद्यात्मकश्च		
११६ पिण्डोपनिषत्	पिण्डो.	पद्यात्मकः		
११७ पीताम्बरोपनिषत्	पीतांबरो.	वाक्यात्मकः		
११८ पुरुषसूक्तोपनिषत्	पु. सू.	मंत्रात्मकः		
११९ पैङ्गलोपनिषत्	पैङ्गलो.	अध्यायात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१२०–१ प्रणवोपनि.	१ प्रणवो.	पद्यात्मकः		
१२१–२ ,,	२ प्रणवो.	वाक्यात्मकः		
१२२ प्रश्नोपनिषत्	प्रश्नो.	प्रश्नात्मकः		
१२३ प्राणाग्निहोत्रोपनिषत्	प्राणाग्नि., प्रा. हो.	खण्डात्मकः	मंत्रात्मकः वाक्यात्मकश्च	
१२४ ब्रटुकोपनिषत्. (वटुकोप.)	बटुको.	वाक्यात्मकः पद्यात्मकश्च		
१२५ बह्वृचोपनि.	बह्वृचो.	वाक्यात्मकः		
१२६ बाष्कलमन्त्रोपनि.	बा. मं.	वाक्यात्मकः		
१२७ १ बिल्वोपनि.	१ बिल्वो.	पद्यात्मकः		
१२८ २ ,,	२ बिल्वो.	वाक्यात्मकः पद्यात्मकः		
१२९ बृहज्जाबालोपनि.	बृ. जा., बृहजा.	ब्राह्मणात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१३० बृहदारण्यकोपनि.	बृ.उ., बृह.	अध्यायात्मकः	ब्राह्मणात्मकः	वाक्यात्मकः
१३१ ब्रह्मबिन्दूपनिषत् (अमृतबिन्दूप.)	ब्र. बिं.	पद्यात्मकः		
१३२ ब्रह्मविद्योपनिषत्	ब्रह्मवि.,ब्र.वि.	पद्यात्मकः		
१३३ ब्रह्मोपनि.	ब्रह्मोप., ब्रह्मो.	वाक्यपद्यात्मकः		

	उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१३४	भगवद्गीतोपनिषत्	भ. गी.	अध्यायात्मकः	पद्यात्मकः	
१३५	भवसन्तरणोपनि.	भवसं.	अध्यायात्मकः	पद्यात्मकः	
१३६	भस्मजाबालोपनि.	भ.जा., भस्मजा.	अध्यायात्मकः	वाक्यात्मकः	
१३७	भावनोपनि.(कापिलोप.)	भावनो.	वाक्यात्मकः		
१३८	भिक्षुकोपनिषत्	भिक्षुको.	वाक्यात्मकः		
१३९	मठाम्नायोपनिषत्	मठाम्ना.	वाक्यात्मकः		
०	महावाक्यरत्नावलिः	म. वा. र.	प्रकरणात्मकः		
१४०	मण्डलब्राह्मणोपनि.	मं. ब्रा.	ब्राह्मणात्मकः	वाक्यात्मकः	
१४१	मंत्रिकोपनिषत् (चूलिकोप.)	मंत्रिको.	पद्यात्मकः		
१४२	मल्लायुपनि.	(अशुद्धप्रचुरा कोशासंगृहीतवाक्या)			
१४३	महानारायणोपनि. (बृहन्नारायणो.–उत्तरनारायणो.)	महाना., म.ना.	खण्डात्मकः	मंत्रात्मकः	
१४४	महावाक्योपनि.	महावा.	वाक्यात्मकः		
१४५	महोपनिषत्	महो.	अध्यायात्मकः	पद्यात्मकः	
१४६	माण्डूक्योपनिषत्	माण्डू.	वाक्यात्मकः		
१४७	मुक्तिकोपनिषत्	मुक्तिको., मुक्ति.	अध्यायात्मकः	वाक्यपद्यात्मकः	
१४८	मुण्डकोपनि.	मुण्डको.,मुण्ड.	मुण्डकात्मकः	खडात्मकः	मंत्रात्मकः
१४९	मुद्गलोपनिषत्	मुद्गलो.	खण्डात्मकः	वाक्यात्मकः मंत्रात्मकः	
१५०	मृत्युलांगूलोपनिषत्	मृत्युलां.	वाक्यात्मकः पद्यात्मकश्च		
१५१	मैत्रायण्युपनिषत्	मैत्रा.	प्रपाठात्मकः	वाक्यात्मकः	
१५२	मैत्रेय्युपनिषत्	मैत्रे., मैत्रे.उ.	अध्यायात्मकः	गद्य-पद्यात्मकः	
१५३	यज्ञोपवीतोपनिषत्	यज्ञोप.	वाक्यात्मकः पद्यात्मकश्च		
१५४	याज्ञवल्क्योपनिषत्	याज्ञव.	वाक्यात्मकः पद्यात्मकश्च		
१५५	योगकुण्डल्युपनिषत्	योगकुं.	अध्यायात्मकः	पद्यात्मकः	
१५६	योगचूडामण्युपनिषत्	यो. चू.	पद्यात्मकः वाक्यात्मकश्च		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१९७–१ योगतत्त्वोपनिषत्	१ यो. त.	पद्यात्मकः		
१९८–२ ,,	२ योगत.	पद्यात्मकः		
१९९ योगराजोपनिषत्	योगरा.	पद्यात्मकः		
१६० योगशिखोपनिषत्	यो. शि.	अध्यायात्मकः	पद्यात्मकः	
१६१ योगोपनिषत्	योगो.	पद्यात्मकः		
१६२ राजश्यामला-रहस्योपनिषत्	रा. श्या. र.	वाक्यात्मकः		
१६३ राधिकोपनिषत्	राधिको.	वाक्यात्मकः		
१६४ राधोपनिषत्	राधो.	प्रपाठात्मकः	वाक्यात्मकः	
१६५ रामपूर्वतापिन्युपनि.	रा.पू.,रामपू.	उपनिषदात्मकः	पद्यात्मकः	
१६६ रामरहस्योपनिषत्	रामर.	अध्यायात्मकः	पद्यात्मकः वाक्यात्मकः	
१६७ रामोत्तरतापिन्युपनि.	रामो., रामोत्त.	खण्डात्मकः	मंत्रात्मकः वाक्यात्मकश्च	
१६८ रुद्रहृदयोपनिषत्	रुद्रहृ.	पद्यात्मकः		
१६९ रुद्राक्षजाबालोपनि.	रु. जा.	पद्यात्मकः वाक्यात्मकश्च		
१७० रुद्रोपनिषत्	रुद्रो.,रुद्रोप.	वाक्यात्मकः		
१७१ लक्ष्म्युनिषत्	लक्ष्म्यु.	वाक्यात्मकः		
१७२ लांगूलोपनिषत्	लांगूलो.	मंत्रात्मकः		
१७३ लिङ्गोपनिषत्	लिङ्गो.	वाक्यात्मकः		
० वाजसनेयीसंहिता (यजुर्वे.)	वा. सं.	अध्यायात्मकः	मंत्रात्मकः (कंडिकात्मकः)	
१७४ वज्रपञ्जरोपनिषत्	व. पं.	वाक्यात्मकः		
१७५ वज्रसूचिकोप.	व.सू., वज्रसू.	वाक्यात्मकः		
१७६ वनदुर्गोपनिषत्	वनदु.	वाक्यात्मकः पद्यात्मकश्च		
१७७ वराहोपनिषत्	वराहो.	अध्यायात्मकः	पद्यात्मकः	
१७८ वासुदेवोपनिषत्	वासुदे., वासु.	वाक्यात्मकः		
१७९ विश्रामोपनिषत्	विश्रामो.	पद्यात्मकः		
१८० विष्णुहृदयोपनिषत्	विष्णुहृ.	खण्डात्मकः	मन्त्रात्मकः	
१८१ वैतथ्यप्रक. (मांडू.)	वैतथ्य.	पद्यात्मकः		

उपनिषन्नामानि	त्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
१८२ शरभोप.	शरभोपनिषत्	पद्यात्मकः वाक्यात्मकश्च		
१८३ शाट्यायनीयोपनिषत्	शाट्याय.	पद्यात्मकः वाक्यात्मकश्च		
१८४ शाण्डिल्योपनिषत्	शांडि.,शाण्डि., शाण्डिल्यो.,शां.	अध्यायात्मकः	खंडात्मकः	वाक्यात्मकः पद्यात्मकश्च
१८५ शारीरकोपनिषत्	शारीर.	वाक्यात्मकः पद्यात्मकश्च		
१८६–१ शिवसङ्कल्पोपनिषत्	१ शिवसं.	मन्त्रात्मकः		
१८७–२ शिवसङ्कल्पोपनिषत्	२ शिवसं.	मन्त्रात्मकः		
१८८ शिवोपनिषत्	शिवो.	अध्यायात्मकः	पद्यात्मकः	
१८९ शुकरहस्योपनिषत्	शुकर., शु. र.	खण्डात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१९० शौनकोपनिषत्	शौनको.	खण्डात्मकः	वाक्यात्मकश्च	
१९१ श्यामोपनिषत्	श्यामोप.	वाक्यात्मकः		
१९२ श्रीचक्रोपनिषत् (श्रीमद्भगवद्गीतोपनि.)	श्रीचक्रो.	मंत्रात्मकः	वाक्यात्मकश्च	
१९३ श्रीविद्यातारकोपनि.	श्रीवि. ता.	पादात्मकः	वाक्यात्मकः पद्यात्मकश्च	
१९४ श्रीसूक्तम्	श्रीसू.	मंत्रात्मकः		
१९५ श्वेताश्वोपनिषत्	श्वेता.,श्वेताश्व.	अध्यायात्मकः	पद्यात्मकः मंत्रात्मकः	
१९६ षोढोपनिषत्	षोढो.	वाक्यात्मकः		
१९७ सङ्कर्षणोपनिषत्	सङ्कर्ष., संक.	वाक्यात्मकः		
१९८ सदानन्दोपनिषत्	सदानं.	वाक्यात्मकः पद्यात्मकश्च		
१९९ संध्योपनिषत्	सन्ध्यो.	वाक्यात्मकः पद्यात्मकश्च		
२००–१ सन्न्यासोपनिषत्	१ सं. सो.,	अध्यायात्मकः		
२०१–२ सन्न्यासोपनिषत्	२ सन्न्यासो.	वाक्यात्मकः पद्यात्मकः		
२०२ सरस्वतीरहस्योप.	सरस्व.	मन्त्रात्मकः पद्यात्मकश्च		

उपनिषन्नामानि	तत्संकेतनामानि	प्रथमांकः	द्वितीयांकः	तृतीयांकः
२०३ सर्वसारोप. (सर्वोपनि.)	सर्वसारो., सर्वसा.	वाक्यात्मकः		
२०४ सहवै. (सहवा.उ.)	सहवै.	वाक्यात्मकः मंत्रात्मकश्च		
२०५ संहितोपनिषत्	संहितो.	वाक्यात्मकः मंत्रात्मकश्च		
२०६ सामरहस्योपनिषत्	सामर.	वाक्यात्मकः		
० सामवेदः	सामवे.			
२०७ सावित्र्युपनिषत्	सावित्र्यु.	वाक्यात्मकः		
२०८ सिद्धान्तविठ्ठलोपनिषत्	सि.वि.	वाक्यात्मकः		
२०९ सिद्धान्तशिखोपनिषत्	सि. शि.	पद्यात्मकः मन्त्रात्मकश्च		
२१० सिद्धान्तसारोपनिषत्	सि. सा.	आवरणात्मकः	वाक्यात्मकः	
२११ सीतोपनिषत्	सीतो.,सीतोप.	वाक्यात्मकः पद्यात्मकश्च		
२१२ सुदर्शनोपनिषत्	सुदर्श.	वाक्यात्मकः पद्यात्मकश्च		
२१३ सुबालोपनिषत्	सुबालो.	खण्डात्मकः	वाक्यात्मकः	
२१४ सुमुख्युपनिषत्	सुमुख्यु.	गद्यात्मकः		
२१५ सूर्यतापिन्युपनिषत्	सूर्यता.	पटलात्मकः	वाक्यात्मकः पद्यात्मकश्च	
२१६ सूर्योपनिषत्	सूर्यो.	वाक्यात्मकः		
२१७ सौभाग्यलक्ष्म्युपनि.	सौभाग्य. सौ. ल.	वाक्यात्मकः पद्यात्मकश्च		
२१८ स्कन्दोपनिषत्	स्कन्दो.	,,		
२१९ स्वसंवेद्योपनिषत्	स्वसंवे.	वाक्यात्मकः		
२२० हयग्रीवोपनिषत्	हयग्री.	वाक्यात्मकः		
२२१ हंसषोढोपनिषत्	हं.षोढो.,हंसषो.	मन्त्रात्मकः		
२२२ हंसोपनिषत्	हंसो.	वाक्यात्मकः		
० हिरण्यकेशीगृह्यसूत्रम्	हि. गृ. सू.			
२२३ हेरम्बोपनिषत्	हेरम्बो.	गद्यपद्यात्मकः		

॥ इत्युपनिषदः ॥

ॐ

ॐकारोऽयमजरोऽमरोऽभयोऽमृतः ।

ॐकारेण सर्वा वाक् सन्तृण्णा । ॐकार एवेदं सर्वम् ।

उपनिषद्वाक्यमहाकोशः

ॐ

ॐ ॐ इति त्रिरुक्त्वा
चतुर्थः शान्त आत्माप्लुत... अ.शिखो. १
ॐ ॐ नमो भगवते नारायणाय त्रि.म. ना. ७।९
ॐ ॐ नमो भगवते वासुदेवाय त्रि.म. ना. ७।९
ॐ ॐ वाचि प्रतिष्ठा बह्वृचो. २
ॐ अं आ इ ई उ ऊ ऋ ॠ ऌ ॡ
ए ऐ ओ औ अं अः त्रि.म.ना.७।१०
ॐ अघोराय पुरुषाय पुरुषरूपाय
वासुदेवाय नमो नमः विष्णुहृ.२।२४
ॐ अङ्कार मृत्युञ्जय सर्वव्यापक
प्रथमेऽक्षे प्रतितिष्ठ अ. मा. ४
ॐ अदामो ३ पिबा ३ मों देवो
वरुणः सविता २ छां.उ.१।१२।५
ॐ अनिरुद्धाय पुरुषाय पुरुषरूपाय
वासुदेवाय नमो नमः विष्णुहृ. २।८
ॐ अपानात्मने ॐ तत्सद्भूर्भुवः सुवः गोपालो. ३।४
ॐ अहं वृक्षस्य रेरिव शांतिपाठः
ॐ आङ्काराकर्षणात्मक सर्वगत
द्वितीयेऽक्षे प्रतितिष्ठ अ. मा. ४
ॐ आदौ नम उच्चार्य ततो भगवते पदं द. मू. २

ॐ आपो ज्योती रसोऽमृतं ब्रह्म
भूर्भुवः सुवरोम् महाना. ११।७
ॐ आपो ज्योती रसोऽमृतं ब्रह्म
भूर्भुवः स्वरों [मैत्रा.६।३५+ त्रि.म.ना.७।११
ॐ आपोऽमृतमत्र्यस्य... जन्यते
पुरुषोत्तमात् कृ. पु. सि. ३
ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणः शांतिपाठः
ॐ इङ्कार पुष्टिद क्षोभकर तृतीयेऽक्षे
प्रतितिष्ठ अ. मा. ४
ॐ इति तिस्रो मात्राः, एताभिः
सर्वमिदमोतं प्रोतं चास्मिन् मैत्रा. ६।३
ॐ इति प्रतिपद्यन्ते शौनको. १।५
ॐ इतिप्रयुक्तआत्मज्योतिःसकृदावर्तते अ. शिखो. १
ॐ इति ब्रह्म [तैत्ति. १।८।१+ ना. प. ८।२
ॐ इति ब्रह्म भवति तारसा. १।४
ॐ इति ब्रह्मणः प्रवक्ष्यन्नाह ब्रह्मोपा-
प्नवानीति तैत्ति. १।८।१
ॐ इति ब्रह्मा प्रसौति तैत्ति. १।८।१
ॐ इति ब्रह्मेति व्यष्टिसमष्टिप्रकारेण ना. प. ८।१
ॐ इति शंसंति छां.उ.१।१।९

ॐ इति सत्यम् १ऐतरे. ३।६।४
ॐ इति संहरन्नानुसन्दध्यात् नृसिंहो. ४।१
ॐ इति सामानि गायन्ति तैत्ति. १।८।१
ॐ इति होवाच व्यज्ञासिष्ठा इति [२, ३ बृ. उ. ५।२।१, + ६।२।१
ॐ इति होवाच[बृ.उ.३।९।१,१,१ +६।२।१
ॐ इति ह्युद्गायति तस्योपव्याख्यानं छां.उ.१।१।१ +१।४।१
ॐ इति होवानुजानाति नृसिंहो. ८।९
ॐ इति होव स्वरन्नेति छां.उ.१।५।१,३
ॐ इतीदं सर्वम् तैत्ति. १।८।१
ॐ इत्यक्षरम् सन्ध्यो. २०
ॐ इत्यग्निहोत्रमनुजानाति तैत्ति. १।८।१
ॐ इत्यग्ने व्याहरेत् म. जा. २।३
ॐ इत्यध्वर्युः प्रतिगरं प्रतिगृणाति तैत्ति. १।८।१
ॐ इत्यनुजानीध्वं भूतैनमिति नृसिंहो. ९।१
ॐ इत्यनेनैत उपासीताजस्रं मैत्रा. ६।४
ॐ इत्यनेनोद्धृत्यानामयेऽग्नौ जुहोति मैत्रा. ६।२६
ॐ इत्यनेनोर्ध्वमुत्क्रान्तः मैत्रा. ६।२२
ॐ इत्यभिनिधापयन्ति शौनको. १।९
ॐ इत्यभ्यावदते शौनको. १।५
ॐ इत्यस्यावदते शौनको. १।५
ॐ इत्यात्मानं युञ्जीत महाना.१७।१३
ॐ इत्याश्रावयति छां. उ.१।१।५
ॐ इत्युद्गायति[छां.उ.१।१।१+१।१।९ +१।४।१
ॐ इत्येकाक्षरमन्तःप्रणवं विद्धि ना. प. ८।२
ॐ इत्येकाक्षरं ब्रह्म [ध्या.विं. ९+ ब्रह्मवि.२+महाना.११।५+सूर्यो.९ अमृ. २०+ तारसा. २।१ अ. ना. २१ +१प्रणवो+२ भ.गी.८।१३
ॐ इत्येकाक्षरमात्मस्वरूपं तारसा. १।३
ॐ इत्येकाक्षरं परं ब्रह्म तदेवोपासितव्यं तारसा. २।१
ॐ इत्येकाक्षरं ब्रह्म ध्येयं ध्या. बिं.९
ॐ इत्येकेन (एतेन) रेचयेत् अ. ना.२१
ॐ इत्येतदक्षरमादौ प्रयुक्तं ध्यानं ध्यायितव्यं अ.शिखो.१
ॐ इत्येतदक्षरमिदं सर्वं, तस्योपव्याख्यानं भूतं भव्यं भविष्यदिति नृ.पू.२।२+४।२+ माण्डू. १+ नृसिंहो. १।२

ॐ इत्येतदक्षरमुद्गीथमुपासीत छां.उ.१।१।१ +१।४।१
ॐ इत्येतदक्षरमुद्गीथः छां. उ.१।१।५
ॐ इत्येतदक्षरमुपासीत छां. उ. १।४।१
ॐ इत्येतदक्षरस्य चैतत् मैत्रा. ६।४
ॐ इत्येतदक्षरं परं ब्रह्म, अस्य पादाश्चत्वारः अ. शिखो. १
ॐ इत्येतदक्षरं परं ब्रह्म तदेवोपासितव्यं तारसा. २।१
ॐ इत्येतदनुकृति ह स्म वा अप्यो श्रावय तैत्ति. १।८।१
ॐ इत्येतदनुकृति ह स्म... आश्रावयन्ति (मा.) तैत्ति. १।८।१
ॐ इत्येतद्व्याहरेत् नारा. ३
ॐ इत्येतेन (एकेन) रेचयेत् अ. ना. २१
ॐ इत्येव तदा हैषा एव समृद्धिः छां. उ. १।१।८
ॐ इत्येव यदुद्भूतं ज्ञानं ज्ञेयात्मकं शिवम् । असंस्पृष्टविकल्पांशं प्राणस्पन्दो निरुध्यते शाण्डि. १।३४
ॐ इत्येवं ध्यायथ आत्मानं, स्वस्ति वः मुण्ड. २।२।६
ॐ इत्येवं ध्यायंस्तथाऽऽत्मानंयुञ्जीत मैत्रा. ६।३
ॐ ईङ्कार वाक्प्रसादकर निर्मल चतुर्थेऽक्षे प्रतितिष्ठ अ. मा. ४
ॐ ईशानाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः विष्णुहृ.२।२६
ॐ ईं ओं नमो भगवते श्रीमहागरुडाय ... गारुडो. १०
ॐ ईसचरतिसचरति...वज्रेण स्वाहा गारुडो. १२
ॐ उशन् ह वै वाजश्रवसः सर्ववेदसं ददौ कठो. १।१
ॐ उङ्कार सर्वबलप्रद सारतर पञ्चमेऽक्षे प्रतितिष्ठ अ. मा. ४
ॐ उदानात्मने ॐतत्सद्भूर्भुवः सुवः गोपालो.३।८
ॐ ऊङ्कारोच्चाटनकर दुस्सह षष्ठेऽक्षे प्रतितिष्ठ अ. मा. ४
ॐ ऋङ्कार सङ्क्षोभकर चञ्चल सप्तमेऽक्षे प्रतितिष्ठ अ. मा. ४
ॐ ॠङ्कार सम्मोहनकरोज्ज्वलाष्टमेऽक्षे प्रतितिष्ठ अ. मा. ४

ॐ लृङ्कार विद्वेषणकर मोहक नवमेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ लॄङ्कारमोहकरदशमेऽक्षेप्रतितिष्ठ	अ. मा. ४
ॐ एङ्कार सर्ववश्यकर शुद्धसत्त्वैकादशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ऐङ्कार शुद्धसात्त्विक पुरुषवश्यकर द्वादशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ऐं ह्रीं श्रीं आनन्देश्वराय विद्महे सुधादेव्यै...प्रचोदयात्,तन्नो अर्धनारीश्वरः प्रचोदयात्	वनदु. १४६
ॐ ओङ्काराखिलवाङ्मय नित्यशुद्ध त्रयोदशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ औङ्कार सर्ववाङ्मय वश्यकर चतुर्दशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ अंङ्कार गजादिवश्यकर मोहन पञ्चदशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ अःकार मृत्युनाशनकर रौद्र षोडशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ कङ्कार सर्वविषहर कल्याणद सप्तदशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐकार एवेदं सर्वं	छां.उ.२।२४।४
ॐकारध्वनिनादेन	ध्या. बिं. २३
ॐकारप्रभवं सर्वं	ध्या. बिं. १६
ॐकारमात्मानमुपदिदेश	नृसिंहो. ९।१
ॐकारप्रभवा देवाः	ध्या. बिं. १६
ॐकारप्रभवाः स्वराः	ध्या. बिं. १६
ॐकारप्लवेन...पारं तीर्त्वा	मैत्रा.६।२४
ॐकारप्लवेनान्तर्हृदयाकाशस्य पारं	मैत्रा. ६।२८
ॐकारस्तु तथा योज्यः [ब्र.वि.१२+	प्रणवो. १२
ॐकारस्त्रिविधो विचित्रकरणैः प्राणश्च वायोर्जयः...	अमन.२।१०७
ॐकारस्योत्पत्तिं विप्रो न जानाति, तत्पुनरुपनयनं	२ प्रणवो. १४
ॐकारस्वरभूषितं	पञ्चब्र. १४
ॐकारं तत्र चिन्तयेत्	१ यो.शि.१।७१
ॐकारं प्रणवात्मानं तन्मेमनःशिव...	२ शिवसं. २१
ॐकारं रथमारुह्य	अमृ. बिं. २
ॐकारं सर्वेश्वरं द्वादशान्ते	नृसिंहो. ६
ॐकारात्सावित्री	बटुको. २७
ॐकाराद्व्याहृतिरभवत्	गायत्रीर. १
ॐकारान्तरालिकं मनुमावर्तयेत्	गो. पू. ३।१०
ॐकारेण सर्वा वाक् सन्तृण्णा	छां.उ. २।२३।४
ॐकारेणेममात्मानं परमं ब्रह्म नृसिंहमन्विष्य ...	नृसिंहो. ७।१
ॐकारो परे ब्रह्मणि पर्यवसितः	नृसिंहो. ६।३
ॐकारो बाणः शक्तिरेव पीठं	लिङ्गोप. २
ॐकारोऽयमजरोऽमरोऽभयोऽमृतः	गोपालो. २।१४
ॐकारो यूपः	प्रा. हो. ४।३
ॐकारो वेदानामुत्तरोपनिषदं व्याख्यास्यामः	२ प्रणवो. १४
ॐ काली कपालिनी	कालिको. १
ॐ कुमारीपदत्रिहारबाणोग्रमूर्तये ... स्वाहा	लांगूलो. ७
ॐ केशवाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः	विष्णुहृ. २।१०
ॐ क्रतो स्मर कृतं स्मर[ईशा.१७+	बृ. उ. ५।१५।१
ॐ क्लीं कृष्णाय गोविन्दाय गोपीजन ...स्वाहा	त्रि.म.ना.७।१०
ॐ क्षङ्कार परात्पर तत्त्वज्ञापक... शिखामणौ...	अ. मा. ४
ॐ खङ्कार सर्वक्षोभकर व्यापकाष्टादशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ खं ब्रह्म, खं पुराणं वायुरंखमिति	बृ. उ. ५।१।१
ॐ खेचराय नमः...सत्त्वाय नमः	अक्ष्यु. १
ॐ गङ्कार सर्वविघ्नशमन महत्तरैकोनविंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ गं गणपतये नमः	गणप. ७
ॐ गोविन्दाय पुरुषाय पुरुषरूपाय वासुदेवाय नमो नमः	विष्णुहृ. २।११
ॐ घङ्कार सौभाग्यद स्तम्भनकर विंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ घृणिः सूर्य आदित्यः	त्रि.म.ना.७।११
ॐ ङङ्कार सर्वविषनाशकरोग्रैकविंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ चक्षुश्चक्षुश्चक्षुस्तेजः स्थिरो भव	चाक्षुषो. २
ॐ चङ्काराभिचारघ्न क्रूर द्वाविंशेऽक्षे प्रतितिष्ठ	अ. मा. ४

ॐ छक्कार भूतनाशकर भीषण त्रयोविंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ जक्कार कृत्यादिनाशकर दुर्धर्ष चतुर्विंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ झक्कार भूतनाशकर पञ्चविंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ञक्कार मृत्युप्रमथन षड्विंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ टक्कार सर्वव्याधिहर सुभग सप्तविंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ठक्कार चंद्ररूपाष्टाविंशेक्षे प्रतितिष्ठ	अ. मा. ४
ॐ डक्कार गरुडात्मक विषघ्न शोभनैकोनत्रिंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ ढक्कार सर्वसम्पत्प्रद सुभग त्रिंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ णक्कार सर्वसिद्धिप्रद मोहकरैकत्रिंशेऽक्षे प्रतितिष्ठ	अ. मा.२४
ॐ तक्कार धनधान्यादिसम्पत्प्रद प्रसन्न द्वात्रिंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ तत्पुरुषाय पु...पु...वासु...	विष्णुहृ. २।२५
ॐ तत्पुरोर्नमः	महाना. १६।१
ॐ तत्सदिति निर्देशः	भ. गी. १७।२३
ॐ तत्सत्यम्, ॐ तत्सर्वम्	महाना. १६।१
ॐ तत्सद्यत् परं ब्रह्म +गणेशो. १४+	रामो. २।४ श्रीवि.ता.४।१
ॐ तत्सर्वम् ॐ तत्पुरोर्नमः	महाना. १६।१
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि [त्रि.म.ना.७।१।११+ +वनदु.९+सूर्यो. २+	महाना.११।७ पारायणो. ११
ॐ तदात्मा ॐतत्सत्यम्	महाना. १६।१
ॐ तदेति। सद्योजातात्पृथिवी	बृ. जा. १।५९
ॐ तद्गणेशः, ॐसद्गणेशः, ॐपरं गणेशः	ग. शो. १।२
ॐ तद्ब्रह्म ॐतद्वायुः	महाना. १६।१
ॐ तद्ब्रह्मात्मकाः सच्चिदानन्दाख्याः	रामो. २
ॐ तद्ब्रह्मेति चोच्चार्य	बृ. जा. ३।२४
ॐ तद्रामभद्रः परं ज्योती रसोऽहं	रामो. २।४
ॐ तद्वायुः, ॐतदात्मा	महाना. १६।१
ॐ तस्मै महाग्रासाय महादेवाय शूलिने	शरभो. २४
ॐ त्रिविक्रमाय पुरुषाय पुरुषरूपाय...	विष्णुहृ. २।१६
ॐ थक्कार धर्मप्राप्तिकर निर्मल त्रयस्त्रिंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
ॐ दक्षिणामूर्तिरीश्वरोम्	त्रि.म.ना. ७।९
ॐ दक्कार पुष्टिवृद्धिकर प्रियदर्शन चतुस्त्रिंशेऽक्षे प्रतितिष्ठ	अ. मा. ४
श्चत्वारि स्थानानि परब्र. ३
(तत्र) चतुष्पादं ब्रह्म विभाति जाग-
रितं स्वप्नं सुषुप्तं तुरीयमिति ब्रह्मो. २
चतुष्पादिदमक्षरं परं ब्रह्म ब्र.शिखो. १
चतुःकलालयेनापि निद्राभावो निव-
र्तते। हृदि स्फुलिंगवद्योगी.. अमन. १।४६
चतूरूपो ह्ययमकारः स्थूलसूक्ष्म-
बीजसाक्षिभिरकाररूपैराप्तेरादि-
मत्त्वाद्वा..आप्नोति ह वा इदं सर्वं.. नृसिंहो. २।४
चतूरूपो ह्ययं मकारः स्थूलसूक्ष्म-
बीजसाक्षिभिर्मकाररूपैरपीतेर्वा
स्थूलत्वात्.. साक्षित्वाच्च.. नृसिंहो. २।६
चतूरूपो ह्ययमुकारः स्थूलसूक्ष्मबीज-
साक्षिभिरुकाररूपैरुत्कर्षात्..
साक्षित्वाद्योत्कर्षति ह वै ज्ञान-
सन्ततिं.. नृसिंहो. २।५
चतूरूपो ह्ययमोङ्कार ओतानुज्ञात्रनु-
ज्ञाविकल्पैरोङ्काररूपैरात्मैव नृसिंहो. २।७
चत्वारः पादाश्चत्वार्यङ्गानि भवन्ति नृ.पू. २।२
चत्वारः पुरुषा इति बाध्वः, शरीर-
पुरुषश्छंदःपुरुषो वेदपुरुषो महा-
पुरुष इति ऐत. २।३।१
चत्वारि वाक्परिमिता पदानि सरस्व. १६
[ना.पू.ता.५।८+ ऋ.ब्र. २।३।२२
[=मं. १।१६४।४५ +अथर्व. ९।१०।२७
चत्वारि शृङ्गा त्रयो अस्य पादाः.. महाना. ८।१०
[शौनको.४।६+तै.आ.१०।१०।२ ऋ.अ. ३।८।१०
[=मं.४।५८।३+वा.सं.१७।९१

(७०) चत्वारिंशत्संस्कारसम्पन्नः सर्वतोविरक्तः.. साधनचतुष्टय- सम्पन्न एव सन्न्यस्तुमर्हति १ सं. सो. २।१
चत्वारिंशदथतिस्रः समिधा उशती- रिव मातरो माविशन्तु त्रिपुरो. ३
चत्वारो दोषः प्रहरन्ति यस्य सर्वस्य गोप्त्रे..रयिमत्प्रवृद्धयै स्वाहा पारमा. ९।१
चत्वारो मनवस्तथा भ. गी. १०।६
चत्वारो वेदा उपवेदाः पुराणानि... तस्याउत्पद्यमानानि भवन्ति सामर. ९२
चन्दनं वापि गोपीनां.. मुक्तिमुक्तिफलप्रदम् गोपीचं. २२
चन्द्र इव राहोर्मुखात्प्रमुच्य शरीर- मकृतं कृतात्मा ब्रह्मलोकमभि- संभवामि छान्दो.८।१३।१
चन्द्र एव,सविता नक्षत्राणि सावित्री सावित्र्यु. ७
चन्द्रमण्डलसङ्काश...विषं हर हर हुं फट्स्वाहा गारुडो. ११
चन्द्रमसा वाव सर्वाणि ज्योतींषि महीयन्ते तैत्ति. ५।२
चन्द्रमसि तृप्यति दिशस्तृप्यन्ति छान्दो.५।२०।२
चन्द्रमसैवायं ज्योतिषाऽऽस्ते पल्यते कर्म कुरुते विपल्येति.. बृह. ४।३।३
चन्द्रमसो रोहिणी, ऋषीणामरुन्धती चित्त्यु. ९।१
चन्द्रमसो विद्युतंतत्पुरुषोऽमानवः [छान्दो. ४।१५।५ + ५।१०।२
चन्द्रमा अथकारः, आत्मेहकारः छान्दो.१।१३।१
चन्द्रमा अहैम पूर्वपक्षापरपक्षान् विचिनोति,... १ऐत. १।७।५
चन्द्रमा एवास्य ज्योतिर्भवति बृह. ४।३।३
चन्द्रमानिधनं,एतद्राजनंदेवतासुप्रोतं छान्दो.२।२०।१
चन्द्रमा मनसो जातः [पु.सू.+ चित्त्यु. १२।६ [+सुबालो. १।५+ ऋ.अ.८।४।१९ [=मं.१०।९०।१३+ वा.सं. ३१।१२
चन्द्रमा मनो भूत्वा हृदयं प्राविशत् २ऐत. १।४
चन्द्रमा रयिर्वा एतत्सर्वं यन्मूर्तं चामूर्तंच तस्मान्मूर्तिरेव रयिः प्रश्नो. १।५
चन्द्रमाः षड्ढोता, सक्तून्.. चित्त्यु. ७।३

चन्द्रमेवाप्येति यश्चन्द्रमेवास्तमेति सुबालो. ९।१०
चन्द्रवद्विमलःपूर्णः सदानन्दःस्वयंप्रभः अध्यात्मो. ११
चन्द्रवच्चरते देही स मुक्तश्चानिकेतनः पैङ्गलो. ४।४
चन्द्रसूर्यौ समौ कृत्वा तयोर्योगः प्रवर्तते १यो.शि.१।११६
चन्द्रसूर्यादिकौ त्यक्त्वा राहुश्चे- क्ष्यते जगत् (तदा जगत्सत्यम्) ते. बिं. ६।९४
चन्द्रात्रेयस्तथाऽत्रिश्च ऋष्यात्रेयो मुनित्रयम् । एतैर्महात्मभिः प्रोक्ताः शिवधर्माः समासतः शिवो. ७।१३६
चन्द्रार्कमध्यमा शक्तिर्यत्रस्था तत्र बन्धनम् योगकुं. ३।७
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं.... श्री.सू.५= ऋ.खि.५।८७।५
चन्द्रांशेन समभ्यस्य सूर्यां- शेनाभ्यसेत्पुनः यो.चू. ६७
चन्द्रां हिरण्मयीं लक्ष्मीं जात- वेदो म आवह [श्रीसू. १,१४= ऋ.खि. ५।८७
चन्द्रे चित्तसंयमात्ताराव्यूह- ज्ञानम् (भवति) शांडि.१।७।५२
चमूषच्छ्येनः शकुनो विभृत्वा सुदर्श. ७
चम्पकातसीकुंकुमपिङ्गलेन्द्रनील... घनसारसन्निभंगायत्र्याःप्रत्यक्षर- मनुस्मृत्य.. गायत्रीर. ९
चरणं नो लोके सुधितां दधातु [त्रि.म.ना. ७।३ +सुदर्श. ५
चरणं पवित्रं विततं पुराणं [त्रि.म.ना. ७।३+महाना. ५।१० सुदर्श. ५
चरतां चक्षुरादीनां विषयेषु यथा- क्रमम् । यत्प्रत्याहरणंतेषांप्रत्या- हारः स उच्यते यो.चू. १२०
चरेन्माधुकरं भैक्षं यतिर्म्लेच्छ- कुलादपि । एकान्नं नतु भुञ्जीत बृहस्पतिसमादपि १सं.सो.२।७१
चर्मखण्डं द्विधा भिन्नमपानोद्गार- धूपितम् । ये रमन्ति नमस्तेभ्यः साहसं किमतःपरम् ना. प. ४।३०

चलदृष्ट्या व्योमभागवीक्षितुःपुरुषस्य दृष्ट्यग्रेज्योतिर्मयूखा वर्तन्ते; तद्दर्शनेन योगी भवति — अद्वयता. ३
चलनदृष्ट्या व्योमभागवीक्षितुः ..तद्दृष्टिः स्थिरा भवति — मं. ब्रा. १।३
चलस्थिरोभयाभावैरावृणोत्येव बालिशः — अ. शां. ८३
चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् [ना.प. ६।४४+ — वैतथ्य. ३८
चले वाते चलो बिन्दुर्निश्चले निश्चलो भवेत्। योगी स्थाणुत्वमाप्नोति ततो वायुं निरोधयेत् — यो.चू. ८९
चाकश्यमानमिव जाज्वल्यमानमिव देदीप्यमानमिव लेलिहानं तदेव मे ब्रह्म — आर्षे. ५।२
चाक्षुषपंक्तिपुनाति(उपनिषत्पाठकः) — राधिको. ९
चाक्षुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा — बृह. २।५।५
चाक्षुषः स्वप्नचारी च सुप्तः सुप्तात्परश्च यः। भेदाश्चैतेऽस्य चत्वारस्तेभ्यस्तुर्यं महत्तरम् — मैत्रा. ७।११
चाक्षुषी दीप्तिर्भविष्यति(चा.विद्यया) — चाक्षुषो. १
चाक्षुष्मतीविद्यां ब्राह्मणो यो नित्यमधीते न तस्याक्षिरोगो भवति — अक्ष्यु. ३
चाण्डालदेहे पश्वादिस्थावरे ब्रह्मविग्रहे। अन्येषु तारतम्येन.. — वराहो. ३।१६
चाण्डालोऽचाण्डालः (भवति) पौल्कसोऽपौल्कसः.. — बृह. ४।३।२२
चातुर्वर्ण्यं मया सृष्टं — भ.गी. ४।१३
चापबाणधरं श्यामं ससुग्रीवं.. रामभद्रं हृदि ध्यात्वा — रामर.२।८४,८५
चापलानि न कुर्वीत स सर्वार्थमवाप्नुयात्। नकुर्यात्केनचिद्वैरमध्रुवे जीविते सति — शिवो. ७।५८
चिचन्द्रमयीति सर्वाङ्गस्रवणं स्नानम् — भावनो. ८
चिकीर्षुर्लोकसंग्रहम् — भ.गी. ३।२५
चिचिदाकारतो भिन्ना न भिन्ना चित्त्वहानितः [अ.पू. ४।३३+ — रुद्रहृ. ४४
चिच्चैतन्यस्वरूपोऽहमहमेवपरःशिवः — ते.बिं. ३।२३
चिच्चैत्यकलितो बन्धस्तन्मुक्तो मुक्तिरुच्यते। चिदचैत्या किलात्मेति सर्वसिद्धान्तविग्रहः — महो. ६।७७
चिच्चैत्ये स्वयमम्लानं मननान्मन उच्यते। अतःसङ्कल्पसिद्धेयं सङ्कल्पेनैव नश्यति — महो. ४।१२३
चिज्जडानां तु यो द्रष्टा सोऽच्युतो ज्ञानविग्रहः। स एव हि महादेवः.. — स्कंदो. ४
चितश्चिन्नाचिदाकाराद्भिद्यतेजडरूपतः। भिद्यतेचेज्जडोभेदश्चिदेकासर्वदा.. — रुद्रहृ. ४५
चितिच्छायासमावेशाज्जीवः स्याद्व्यावहारिकः। अस्यजीवत्वमारोपात् साक्षिण्यप्यवभासते — सरस्व. ४४
चिति सत्यं जगत्तथा। प्रतिभासत एवेदं न जगत्परमार्थतः — महो. ५।१०७
चितोरूपमिदंब्रह्मन्क्षेत्रज्ञ इतिकथ्यते — महो. ५।१२४
चित्तइतिचित्तविदोधर्माधर्मौचतद्विदः — वैतथ्य. २५
चित्तकाला हि येऽन्तस्तु द्वयकालाश्च ये बहिः। कल्पिता एव ते सर्वे.. — वैतथ्य. १४
चित्तत्यागः परं सुखम्। अतश्चित्तं चिदाकाशे नय क्षयं.. — अ. पू. ५।११७
चित्तनाशः सुखाय च। चित्तसत्तां क्षयं नीत्वा..चित्तं नाशमुपानयेत् — अ. पू. ४।१५
चित्तनाशाभिधानंहियदातेविद्यतेपुनः — मुक्तिको. २।३४
चित्तनाशे विरूपाख्ये न किञ्चिदिह विद्यते। न गुणा नागुणास्तत्र.. — अ.पू. ४।२१
चित्तमध्यात्मं, चेतयितव्यमधिभूतं क्षेत्रज्ञस्तत्राधिदैवतं, नाडी तेषां निबन्धनम् — सुबालो. ५।९
चित्तमन्तर्गतंदुष्टंतीर्थस्नानैर्नशुद्ध्यति — जा. द. ४।५४
चित्तमपानयोर्गम जिह्वाद्वारा रसगुणउपस्थाधिष्ठितोऽप्सु तिष्ठत्यापस्तिष्ठन्ति — त्रि. ब्रा. १।६
चित्तमर्थेषु चरति पादपेष्विव मर्कटः — अ. पू ३।६
चित्तमाज्यं,वाग्वेदिः, आधीतं बर्हिः — निरु. १।१
चित्तमात्मा, चित्तं प्रतिष्ठा, चित्तमुपास्स्वेति — छान्दो. ७।५।२
चित्तमूलं हि संसारस्तत् प्रयत्नेन शोधयेत् — वराहो. ३।२१

चित्तमूलो विकल्पोऽयं चित्ताभावे न कश्चन। अतश्चित्तं समाधेहि प्रत्यग्रूपे परात्मनि — अध्यात्मो. २६
चित्तमेव हि संसारस्तत्प्रयत्नेन शोधयेत्। यच्चित्तस्तन्मयो भवति (भाति).. — मैत्रा. ६।३४
[मैत्रे. १।९+ — शाट्याय. ३
चित्तमेव हि संसारो रोगादिक्लेश-दूषितम्। तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते — महो. ४।६६
चित्तमेवाप्येति यश्चित्तमेवास्तमेति — सुबालो. ९।१३
चित्तवृत्तिनिरोधेन नाशो ह्यानन्दसम्भवः — गान्धर्वो. ६
चित्तवृत्तेरतीतो यश्चित्तवृत्त्यव-भासकः। सर्ववृत्तिविहीना-नात्मा वैदेही मुक्त एव सः — ते. बिं. ४।५३
चित्तशुद्धिकरं शौचं वासना-त्रयनाशनम् — मैत्रे. २।९
चित्तशुद्धिर्भवेद्यावत्तावन्नित्यं चरेत्सुधीः — ना.प. ५।४७
चित्तशुद्धौ क्रमाज्ज्ञानं त्रुट्यन्ति ग्रंथयः स्फुटम् — पा. ब्र. ४२
चित्तसत्ता परं दुःखं चित्तत्यागः परं सुखम् — अ.पू. ५।११७
चित्तसत्तां क्षयं नीत्वा चित्तं मोक्षमुपानये — अ.पू. ४।१५
चित्तसत्तेहदुःखायचित्तनाशःसुखाय.. — अ. पू. ४।१५
चित्तस्पन्दितमेवेदंग्राह्यग्राहकवद्द्वयं। चित्तं निर्विषयं नित्यं.. — अ.शां. ७२
चित्तस्य निश्चलीभावधारणं धारणां विदुः। सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते — २अवधू. ४
चित्तस्यनिश्चलीभावोधारणाधारणं.. — त्रि.ब्रा. २।३१
चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम्। प्रसन्नात्माऽऽत्मनि स्थित्वासुखमव्ययमश्नुते[मैत्रा.६।२० +मैत्रे.१।११
चित्तस्यान्तर्मुखीभावो प्रत्याहारः [त्रि. ब्रा. ३०+ — २अवधू. ३
चित्तं कारणमर्थानां तस्मिन्सतिजगत्त्रयम्। तस्मिन्क्षीणे जगत्क्षीणं.. [महो. ३।२१+ — यो. शि. ३।२१
चित्तं चरति खे यस्माज्जिह्वा भवति खेगता। तेनैषा खेचरी नाम.. [ध्या.बिं. ८२+ — यो.चू. ५५
चित्तं च चेतयितव्यं च नारायणः — सुबालो. ६।१
चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च विधारयितव्यं च — प्रश्नो. ४।८
चित्तंतुशरदभ्रांशविलयं प्रविलीयते — अक्ष्युप. ३६
चित्तं दूरे परित्यज्य योऽसि सोऽसि स्थिरो भव — महो. ५।५१
चित्तं ध्यानेन यच्चिन्त्यं शास्त्रदृष्टेन कर्मणा। योगस्थेनैव मार्गेण ह्येकाग्रमानसो भवेत् — दुर्वासो. २।५
चित्तं न संस्पृशत्यर्थं नार्थाभासं तथैव च। अभूतो हि यतश्चार्थो नार्थाभासस्ततः पृथक् — अ. शां. २६
चित्तंनिर्विषयंनित्यमसङ्गंतेनकीर्तितं — अ.शां. ७२
चित्तं प्रपञ्चमित्याहुः.. — ते. बिं. ५।३२
चित्तं प्राणभृत्सु...त्वैवाविस्तरामात्मा — १ऐत. ३।२।२
चित्तं प्राणेन सम्बद्धं सर्वजीवेषु संस्थितम्। रज्वा यद्वत्सु-सम्बद्धः पक्षी तद्वदिदं मनः — यो. शि. १।५९
चित्तं बुद्धिरहङ्कार ऋत्विजः सोमपं मनः — अमन. २।७
चित्तं वाव सङ्कल्पाद्भूयो यदा वै चेतयतेऽथ सङ्कल्पयते.. — छान्दो. ७।५।१
चित्तं विनष्टं यदि भासितं स्यात्तत्र प्रतीतो मरुतोऽपि नाशः — यो.शि. १।१२४
चित्तंसञ्जायतेजन्मजरामरणकारणं — मुक्तिको. २।२५
चित्तश्सन्तानेन भवं यत्कारुद्र (?) तनिम्ना — चित्सु. २१।१
चित्तं स्थिरं यस्य विनाऽवलम्बात् स एव योगी स गुरुः स सेव्यः — अमन. २।४३
चित्तं होता (शारीरयज्ञस्य) — प्रा. हो. ४।१
चित्तं ह्येवैषामेकायनम्, चित्तमात्मा — छान्दो.७।५।२
चित्ताकाशं चिदाकाशमाकाशं च.. — महो. ४।५८

चित्तादिविलये जाते पवनस्य लयो भवेत्। मनःपवनयोर्नाशादिन्द्रियार्थान्विमुच्यति	अमन.१।२०
चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात्। निरोधः सर्ववृत्तीनां प्राणयामः स उच्यते	ते.बिं. १।३१
चित्तादिसर्वहीनोऽस्मि	मैत्रे.३।१०
चित्ताद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीतु	छान्दो.७।५।३
चित्तान्वै सलोकान् ध्रुवान् ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिद्धयति	छान्दो.७।५।३
चित्ताहङ्कारयन्तारं जीवाख्यं त्वंपदं भजे	शु. र. २।६
चित्तिः स्रुक्। चित्तमाज्यम्	चित्त्यु. १।१
चित्ते चलति संसारे चलो मोक्षःप्रजायते। तस्माच्चित्तं स्थिरीकुर्यात्..	अमन. २।९१
चित्ते चलति संसारो निश्चलं मोक्ष उच्यते	यो.शि.६।५८
चित्ते चैत्यदशाहीने या स्थितिः क्षीणचेतसाम्। सोच्यते शान्तकलना जाग्रत्येव सुषुप्तता	अ.पू.२।१२
चित्ते तदेकतानता परिकरः	द.मू. १६
चित्ते त्यक्ते लयं याति द्वैतमेतच्च सर्वतः। शिष्यते परमं शान्तमेकमच्छमनामयम्	अ.पू. ५।६३
चित्तेन स्मृतिः(भवति)स्मृत्या स्मारं..	महाना.१७।१३
चित्ते शुद्धे शुचिः साक्षात्प्रत्यग्ज्योतिर्व्यवस्थितः	जा.द. ६।१६
चित्तैककरणा सुषुप्तिः	शारीरको. १०
चित्तैककरणा सुषुप्त्यवस्था भवति	पैङ्गलो. २।८
चित्तैकाग्र्याद्यतोज्ञानमुक्तं समुपजायते	मुक्तिको. २।४९
चित्तोन्मेषनिमेषाभ्यां संसारप्रलयोदयौ	अ.पू. ५।४०
चित्तोपशान्तिफलदं परमं विद्धि कारणम् (प्राणायामः)	अ.पू. ४।४५
चित्परानन्दमस्म्यहम् (?)	ते.बिं. ३।८
चित्स्वं चिदहमेते च लोकाश्चिदिति भावय [याज्ञव. २६+	वराहो. २।४७
चित्प्रसादोपलब्धात्मा स्वर्गो नाहमचेतनः	१सं.सो. २।१६
चित्रदीप इव स्थितः	अक्ष्यु. ४२
चित्रभित्तिरिव मिथ्यामनोरमं (भूतात्मानं)	मैत्रा. ४।२
चित्रस्थदीपैस्तमसो नाशश्चेदस्त्विदं जगत्	ते.बिं. ६।७९
चित्रं देवानामुदगादनीकं [ऋग्.१७ [=मं. १।११५।१+ [अथर्व.१३२।।३५+तै.सं.१।४।४३।१३	ऋ.अ.८।१।७ वा.सं. ७।४२ ऐत.२।३।३
चित्राख्या सीविनी नाडी शुक्र(शुक्र-)मोचनकारिणी	यो.शि. ५।२७
चित्रो ह वै गार्ग्यायणिर्यक्ष्यमाण आरुणिं वव्रे..	कौ.उ. १।१
चित्सामान्यमथासाद्य सत्तामात्रात्मकं ततः। सुषुप्तपदमालम्ब्य तस्थौ गिरिरिवाचलः	अ.पू. ३।१७
चित्सारमनन्ताश्चर्यसागरममिततेजोराश्यन्तर्गततेजोविशेषं..आनंद(परमकैवल्यं) प्रवाहैरलंकृतं	त्रि.म.ना. ७।८
चित्सूत्रघ्राणयोः स्वनिर्गता प्रणवधारा षडंगुलदशाशीतिः	पा. ब्र. ४
चित्स्वरूपोऽहमिति सदा भावयन् सम्यङ्निमीलिताक्षः.. परब्रह्मावलोकयंस्तद्रूपो भवति	अद्वयता. १
चिदक्षरोऽहं सत्योऽहं वासुदेवोऽजरोऽमरः। अहंब्रह्म चिदाकाशं नित्यं..	ते.बिं. ६।६९
चिदग्निस्वरूपपरमानन्दशक्तिस्फुरणं वसम् (ब्रह्मात्मस्वरूपस्य पूजायां)	भावनो. ८
चिदग्निस्वरूपं धूपः (परमात्मपूजायां)	मं.ब्रा. २।५
चिदम्बरं तु हृन्मध्ये आधारे कमलालयम्	जा.द. ४।४९
चिदणोः परमस्यान्तः कोटिब्रह्माण्डरेणवः। उत्पत्तिस्थितिमभ्येत्य लीयन्ते शक्तिपर्ययात्	महो.२।४
चिदहं चिदहं चेति (ब्रह्मास्मीति निश्चयात्) स जीवन्मुक्त उच्यते	ते.बिं. ४।३०
चिदहं चिदिमे लोकाश्चिदाशाश्चिदिमाः प्रजाः	महो.६।७९

चिदाकारस्वरूपोऽसिचिन्मात्रोऽसि.. ते.बिं. ५।६५
चिदाकारस्वरूपोऽस्मि नाहमस्मि.. ते.बिं. ३।४३
चिदाकारं चिदाकाशं चिदेव परमं सुखम् ते.बिं. ६।६२
चिदाकाशमयोऽस्म्यहम् ते.बिं. ३।३
चिदात्मनि सदानन्दे देहरूढामहं-नि यम् । निवेश्य..केवलो भव.. अध्यात्मो. ९
चिदात्मानं नित्यशुद्धबुद्धमुक्तसद्-द्वयः ।.. वासुदेवोऽहमोमिति अध्युप. ४१
चिदात्मा भगवान् सर्वसाक्षित्वेन स्थितोऽस्म्यहम् । तेनात्मना बहुत्वेन.. अ.पू. ३।८
चिदात्मास्मि निरंशोऽस्मि परापर-विवर्जितः । रूपं स्मरन्निजं.. अ. पू. ५।१२
चिदात्माऽहं परात्माऽहं निर्गुणोऽहं परात्परः । आत्ममात्रेणयस्तिष्ठेत् स जीवन्मुक्त उच्यते ते.बिं. ४।१
चिदात्मैकरसोऽस्म्यहम् ते.बिं. ३।१४
चिदादित्यस्वरूपं दीपः(आत्मपूजायां) मं.ब्रा. २।५
चिदादीप्तिः पुष्पम् ,, आत्मपू. १
चिदाद्याद्वितीयब्रह्मसंवित्तिः सच्चिदा-नन्दलहरी महात्रिपुरसुन्दरीबहि-रन्तरनुप्रविश्य स्वयमेकैवविभाति बह्वृचो. २
चिदानन्दतरङ्गिण्याः प्रवाहैरति-मङ्गलम् सि.सा.५।१
चिदानन्दमयानन्तपुष्पमाल्यै-र्विराजमानं.. त्रि.म.ना. ७।१२
चिदानन्दमयोऽस्म्यहम् ते.बिं. ३।४
चिदानन्दरसनिर्झरैरभिव्याप्तम् त्रि.म.ना. ७।९
चिदानन्दैकरसं शिवं प्रशान्तममृतं तत्परं च ब्रह्म तत्त्वमसि शांडि. २।३
चिदानन्दोऽस्म्यहं चेता चिद्घनश्चि-न्मयोऽस्म्यहम् ब्र.वि. ९५
चिदाप्तिः पुष्पं, चिदग्निस्वरूपं धूपः मं.ब्रा. २।५
चिदिहास्तीति चिन्मात्रमिदं चिन्मय-मेवच । चित्त्वं चिदहमेतेच लोका-श्चिदिति भावय [याज्ञव. २+ वराहो. २।४७
चिदेकत्वपरिज्ञाने नशोचतिनमुह्यति अ. पू. ४।३४
चिदेकरसो ह्ययमात्मा नृसिंहो. १।५
चिदेव परमं सुखम् ते. बिं. ६।६२
चिदेव ह्यनुज्ञाता तस्मात्परमेश्वर एवैकमेव तद्भवति (ब्रह्म) नृसिंहो. ८।६
चिद्घनश्चिन्मयोऽस्म्यहम् ब्र. वि. ९९
चिद्ग्रन्थावद्वैतग्रन्थिकत्वानाभ्यादि-ब्रह्मबिलप्रमाणं.. मूलमेकं सत्यं मृण्मयं विज्ञातं स्यात् परब्र. ४
चिद्घनानन्दरूपोऽसि परिपूर्ण-स्वरूपकः ते.बिं. ५।६६
चिद्घनैकरसोऽस्म्यहम् ते.बिं. ६।६५
चिद्धीदं सर्वं काशते प्रकाशते च नृसिंहो. ७।३
चिद्धीदं सर्वं निरात्मकमात्मसात् करोति , तस्मात् परमेश्वर एवैकमेव तद्भवति (ब्रह्म) नृसिंहो. ८।४
चिद्रूपत्वान्न मे जाड्यं सत्यत्वा-न्नानृतं मम । आनन्दत्वान्नमेदुःखं आ. प्र. ३१
चिद्रूपमात्रं ब्रह्मैव सच्चिदानन्द-मद्वयम् । आनन्दघन एवाहम्.. ते. बिं. ३।२६
चिद्रूपमेव प्रतिभानयुक्तं तस्मादखण्डं मम रूपमेतत् वराहो. ३।४
चिद्रूपया मायया संवलितो जीव-सङ्घः सन्न्यासी भवति सामर. ९९
चिद्रूपादित्यमण्डलं द्वात्रिंशद्व्यूह-भेदैरधिष्ठितम् त्रि.म.ना. ७।८
चिद्रूपे आश्रिता जीवास्ते तान्गुणान् प्रपद्य जडतां प्रपेदिरे सामर. १०२
चिद्रूपो जीवो ज्ञानी भवति सामर. ९८
चिद्विवर्तजगतोऽस्य कारणं तत्सदा-हमिति मौनमाश्रय वराहो. ३।७
चिद्व्योमैव किलास्तीह परापर-विवर्जितम् । सर्वत्रासम्भव-त्वेत्यं यत्कल्पान्तेऽवशिष्यते अ. पू. ५।३६
चिन्तनंवासुदेवस्यपरस्यपरमात्मनः । स्वरूपव्याप्तदेहस्य ध्यानं कैवल्य-सिद्धिदम् त्रि.ब्रा. २।१४७
चिन्तयंश्चेतसा कृष्णं मुक्तो भवति संसृतेः गो. पू. १।७
चिन्तयित्वा शरीरस्य नित्यानित्यं हि योगवित् । योगमेव प्रवक्ष्यामि.. दुर्वासो. २।९
चिन्तयेदात्मनाऽऽत्मनि अ. ना. ३२

चुबुकं हृदि विन्यस्य पूरयेद्वायुना पुनः । कुम्भकेन यथाशक्ति धारयित्वा तु रेचयेत् — २यो. त. ११३
चेतनं चित्तरिक्तं हि प्रत्यक्चेतनमुच्यते । निर्मनस्कस्वभावत्वान्न तत्र कलनामलम् — १सं. सो.२।४५
चेतनाधातुरप्येकः स्मृतः पुरुषसंज्ञकः — आयुर्वे. १
चेतनोऽसौ प्रकाशत्वाद्वेद्याभावाच्छिलोपमः — महो. २।६
चेतयितव्यमेवाप्येति यश्चेतयितव्यमेवास्तमेति — सुबालो. ९।१३
चेतसा नान्यगामिना — भ. गी. ८।८
चेतसा सम्परित्यज्य सर्वभावात्मभावनाम् [महो. ४।८+ — अ. पू. १।३२
चेतसा सर्वकर्माणि — भ.गी. १८।५७
चेतसो यदकर्तृत्वं तत्समाधानमीरितम् । तदेव केवलीभावं सा शुभा निर्वृतिः परा — महो. ४।७
चेतामन्तागन्तोत्स्रष्टानन्दयिता कर्ता वक्ता (आत्मा) — मैत्रा. ६।७
चैतन्यमात्रसंसिद्धः स्वात्मारामः सुखासनः — ते. बिं. ४।४७
चैतन्यशक्त्याऽलंकृतस्वात्मचैतन्यकैलासेश्वरलिङ्गाकारं सुपूजितम् — सि. सा. ६
चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित् । जीवत्वं च तथा ज्ञेयं रज्ज्वां सर्पग्रहो यथा — यो. शि. ४।१
चैतन्योऽस्मि समोऽस्म्यहम् — मैत्रा. ३।४
चैत्यनिर्मुक्तचिद्रूपं पूर्णज्योतिस्स्वरूपकम् ।..संविन्मात्रमहं महत् — महो. ६।८१
चैत्यवर्जितचिन्मात्रे पदे परमपावने । अक्षुब्धचित्तो विश्रान्तः स जीवन्मुक्त उच्यते — वराहो. ४।२९
चैत्यानुपातरहितं सामान्येन च सर्वगम् । यच्चित्तत्वमनाख्येयं स आत्मा परमेश्वरः — महो. ४।११
चैत्यानुपातरहितं चिन्मात्रमिह विद्यते । तस्मिन्नित्ये तते शुद्धे.. — महो. ४।१२१
चैतन्यचित्तेजसोऽन्तरात्मा — अद्वैतो. १
चैतन्यमात्मानमणुं महान्तम् । सम्पूजकः पंच महोपपातकैर्युक्तो विमुक्तः शिवरूपमेति — १बिल्वो. ११
चैलाजिनकुशोत्तरम् — भ. गी. ६।११
चोदको दर्शयेन्मार्गं बोधकः स्थानमाचरेत् — ब्र. वि. ५२
चोदको बोधकश्चैव मोक्षदश्च परः स्मृतः । इत्येषां त्रिविधो ज्ञेय आचार्यस्तु महीतले — ब्र. वि. ५१
(ब्लूं) चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् — ऋ.अ. १।३।११
सरस्व.१२+ तै.सं. ४।१।११।२ +वा.सं.२०।८५
चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः । गोस्तेय० सुरापानं भ्रूणहत्यां तिलाः शान्ति० शमयन्तु स्वाहा — महाना. १४।६

छ

छन्दस्तःशिरोदक्षिणः पक्षः,उत्तरः पक्षः पुच्छमात्मेत्याख्यानम् — १ऐत. ३।४।२
छन्दः पुरुष इति यमवोचामाक्षरसमाम्नाय एव — ३ऐत. २।३।१
छन्दांसि जज्ञिरे तस्मात् — चित्त्यु.१२।४
[ऋ.अ.८।४।१८=मं.१०।९०।१० +वा.सं.३१।७
छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं..अस्मान्मायी (देवी) सृजते विश्वमेतत्.. [श्वेता. ४।९+ — शुह्यका. ५४
छन्दांसि यस्य पर्णानि — भ.गी. १५।१
छन्दो जायते पुरुषोत्तमात् — सि. वि.२
छन्दोभिर्विविधैः पृथक् — भ.गी. १३।५
छन्दोभ्योऽध्यमृतात्सम्बभूवसमेन्द्रो मेधया स्पृणोतु [ना.प. ४।४५+ — तैत्ति. १।४।१
छन्दोऽहं,सत्योऽहं,गार्हपत्यो दक्षिणाग्निराहवनीयोऽहम् — अ.शिरः. १।१
छादयन्ति ह वा एनं छन्दांसि — १ऐत. १।६।१

छायातपौब्रह्मविदो वदन्ति पञ्चा-
ग्नयो ये च त्रिणाचिकेताः कठो. ३।१

छित्त्वाऽविद्यामहाग्रन्थिं शिवं गच्छे-
त्सनातनम्। तदेतदमृतं सत्यं.. रुद्रहृ. ३७

छित्त्वैनं संशयं योगं भ. गी. ४।४२

छिद्यतेध्यानयोगेन,सुषुम्नैका नछिद्यते क्षुरिको. १८

छिद्यमानो न ब्रूयात्। तदेवं विद्वांस
इहैवामृता भवन्ति शाट्याय. १८

छिद्यमानोऽपि न कुप्येत न कम्पेतो-
त्पलमिव तिष्ठासेत्.. आकाश-
मिव तिष्ठासेत्.. सत्येन तिष्ठासेत्।
सत्योऽयमात्मा सुबालो.१३।३

छिद्रं भद्रं तथा सिंहंपद्मंचेतिचतुष्टयम् ध्या.बिं. ४३

छिद्रां वा छायांपश्येत्। तदप्येवमेव.. ३ऐत. २।४।५

छिन्दन्तिदात्तृहस्तंचजिह्वामितरस्यच इतिहा. २७

छिन्देन्नाडीशतं धीरः प्रभावादिह
जन्मनि क्षुरिको १९

छिन्नद्वैधा यतात्मानः भ.गी. ५।२५

छिन्नपाशस्तथाजीवःसंसारंतरतेसदा क्षुरिको. २२

छिन्नं भिन्नं मृतं नष्टं वर्धते नास्ति
केवलम्। इत्याद्यान्न वदेच्छ-
न्दान्, साक्षाद्ब्रूयात्तु मङ्गलम् शिवो. ७।८०

छिन्नाभ्रमण्डलं व्योम्नि यथा शरदि
धूयते। वातेन कल्पकेनैव तथा-
ऽन्तर्धूयते मनः महो. ४।९६

छिन्नाभ्रमिव नश्यति भ. गी. ६।३८

छेत्ता न ह्युपपद्यते भ. गी. ६।३९

छेत्तुमर्हस्यशेषतः भ. गी. ६।३९

छेदनचालनदोहैः..जिह्वां कृत्वा...
दृष्टिं भ्रूमध्ये स्थाप्य कपालकुहरे
जिह्वा विपरीतगा यदा भवति
तदा खेचरी मुद्रा जायते.. शांडि. १।७।४३

ज

जक्षन्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा
ज्ञातिभिर्वा नोपजनँ स्मरन् छांदो. ८।१२।३

जगज्जालपदार्थात्मा सर्व एवाह-
मक्षयः। तृतीयो निश्चयो
प्रोक्तो मोक्षायैव द्विजोत्तम महो. ६।५७

जगज्जीवनं जीवनाधारभूतं...
इति कमण्डलुं परिगृह्य..
यथासुखं विहरेत् १सं. सो. २।१२

जगज्जीवनं जीवनाधारभूतं मा ते
मामंत्रयस्व सर्वदा सर्वसौम्येति.. ना. प. ४।५०

जगज्जीवपरमात्मनो जीवभाव-
जगद्भावबाधे प्रत्यगभिन्नं
ब्रह्मैवावशिष्यते पैङ्गलो. २।१०

जगज्जीवादिरूपेण पश्यन्नपि
परात्मवित्। न तत्पश्यति
चिद्रूपं ब्रह्मवस्त्वेव पश्यति पा. ब्र. २९

जगतः शाश्वते मते भ. गी. ८।२६

जगति परमहंसो वासुदेवोऽहमेव वराहो. २।३७

जगत्कारणरूपस्य विकारित्वं
चतुर्थकः (भ्रमः) अ. पू. १।१५

जगत्तस्यामवस्थायामन्तस्तमसि
लीयते। सप्तावस्था इमाःप्रोक्ताः.. महो. ५।१९

जगत्तावदिदं नाहं सवृक्षतृणपर्वतम्।
यद्बाह्यं जडमत्यन्तं तस्स्यां
कथमहं विभुः १सं.सो. २।१३

जगत्प्रहृष्यत्यनुरज्यते च भ.गी. ११।३६

जगत्प्राणायात्मनेऽस्मै नमः स्यान्नम-
स्त्वैक्यं प्रवदेत्प्राग्गुणेति रा. पू. ३।२

जगत्त्रयमिदं सर्वं चिन्मात्रं
स्वविचारतः [महो. ४।८४+ वराहो. २।७२

जगत्त्यक्त्वा सुखी भवेत् याज्ञव. १७

जगत्सर्वमात्मा परमात्मैव नृसिंहो. ९।१

जगत्त्वमहमित्यादिसर्गात्मा दृश्य-
मुच्यते। मनसैवेन्द्रजालश्री-
र्जगति प्रवितन्यते महो. ४।४८

जगत्सर्वमिदं मिथ्याप्रतीतिः
प्राणसंयमः [त्रि.ब्रा. २।३०+ २ अवधू. ३

जगदव्यक्तमूर्तिना भ. गी. ९।४

जगदात्मतयाभाति यदा भोज्यं भवे-
त्तदा। ब्रह्मस्वात्मतया नित्यं
भक्षितं सकलं तदा पा. ब्र. ४६

जगदादित्यो रोचत इति ज्ञात्वा ते मर्त्या विबुधास्तपनप्रार्थनायुक्ता आचरन्ति	पा. ब्र. ५
जगदाहुरनीश्वरम्	भ. गी. १६।८
जगदुत्पत्त्यपायोन्मेषनिमेषं सोमार्काग्निनेत्रं (गणेशं)	ग. शो. ४।८
जगदेतद्भ्रमात्मकम्	महो. ४।६५
जगद्धरणाद्धरो भव (हे शिव)	ग. शो. ३।१३
जगद्धितं वा एतद्रूपं यदक्षरं भवति	नृ. पू. २।९
जगद्भेदोऽपि तद्भानमिति भेदोऽपि तन्मयः	महो. २।७
जगद्भासयतेऽखिलम्	भ.गी. १५।१२
जगद्रूपतयाऽप्येतद्ब्रह्मैव प्रतिभासते	२आत्मो. २
जगद्विकल्पो नोदेति चित्तस्यात्र विलापनात् (पञ्चमभूमिकायां)	अक्ष्युप. ३७
जगद्विपरिवर्तते	भ.गी. ९।१०
जगन्नाम्ना चिदाभाति सर्वं ब्रह्मैव केवलम् ।	यो.शि. ४।१८
जगाम शिखरं मेरोः समाध्यर्थमखण्डितम् । (शुकः)	महो. ५।७९
जघनेनाग्निं प्राक्शिराः संविशति	बृह. ६।३।६
जघन्यगुणवृत्तिस्थाः	भ.गी. १४।१८
जङ्गमरूपवान् भवति (गणेशः)	ग.शो. २।२
जङ्गमरूपःशिवः । शिवएवजङ्गमरूपः	रुद्रोप. २
जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः	मुण्ड. १।२।८
जङ्घेसंयमात्सुतललोकज्ञानं (चित्तस्य)	शांडि. १।७।५२
जजनदिन्द्रमिन्द्रियाय स्वाहा	चित्त्यु. २।१
जटाभस्मधारोऽपिप्राणलिङ्गीहि श्रेष्ठः	रुद्रोप. २
जठरान्तस्थित-यक्ष-गन्धर्व-रक्षः-किन्नरमानुषं (गणेशमस्तुवन्)	ग.शो. ४।७
जडतां वर्जयित्वैकां शिलाया हृदयं हि तत् । अमनस्कस्वरूपं यत्तन्मयो भव सर्वदा	महो. ५।५१
जडत्व-प्रियमोदत्व-धर्माः कारणधर्मगाः । नसन्ति ममनित्यस्य..	आ.प्र. २५
जडस्तु पार्थिवो ज्ञेयोह्यपक्वोदुःखदो भवेत् । ध्यानस्थोऽपि तथाप्येवमिन्द्रियैर्विवशो भवेत्	यो.शि. १।२७
जडाजडदृशोर्मध्ये यत्तत्वं पारमार्थिकम् । अनुभूतिमयं तस्मात् सारं ब्रह्मेति कथ्यते	अ.पू. २।१७
जनइतिजनलोकः,तपइतितपोलोकः	गायत्रीर. २
जनकस्यवैदेहस्य होवाऽश्वलो बभूव	बृह. ३।१।२
जनकं ह वैदेहं याज्ञवल्क्यो जगाम	बृह. ४।३।१
जनकोनाम भूपालो विद्यते मिथिलापुरे । यथावद्वेत्त्यसौ वेद्यं..	महो. २।१९
जनको लालयामास शुकं शशिनिभाननम्	महो. २।२५
जनको (ह) वैदेहोऽभयं त्वा गच्छतात्...	बृह. ४।२।४
जनको ह वैदेह आसाञ्चक्रे	बृह. ४।१।१
जनको ह वैदेहःकूर्चादुपावसर्पन्नुवाच	बृह. ४।२।१
जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे	बृह. ३।१।१
जनश्च नारायणः, तपश्च नारायणः	ना.उ.ता. १।५
जना न विदुरासुराः	भ.गी. १६।७
जनानां पुण्यकर्मणाम्	भ.गी. ७।२८
जनाः सुकृतिनोऽर्जुन	भ.गी. ७।१६
जनेनावमतो योगी योगसिद्धिं च विन्दति । तथाऽऽचरेत वै योगी सतां धर्ममदूषयन्	ना.प. ५।४४
जनोलोकस्तु हृद्देशे कण्ठे लोकस्तपस्ततः	ना.बिं. ४
जन्तोर्दक्षिणकर्णेतु मत्तारंसमुपादिशेत् । निर्धूताशेषपापौघो मत्सारूप्यं भजत्ययम्	मुक्तिको.१।२१
जन्तोः कृतविचारस्य विज्ञानवशतः स्वभावः सम्प्रसीदति	महो.५।६१–६६
जन्मकर्मगुणाश्चैते वर्णसंज्ञाकरा नृणाम् । अन्तिमाभ्यां विहीनस्तु जन्ममात्रेण वर्णभाक्	भवसं.२।६३
जन्मकर्म च मे दिव्यं	भ. गी. ४।९
जन्मकर्मफलप्रदाम्	भ. गी.२।४३
जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयं योऽसौ सूर्ये तिष्ठति, योऽसौ गोषु तिष्ठति, स वो हि स्वामी भवति	गोपालो. १।१२

जन्मनिरोधंप्रवदन्ति यस्य ब्रह्मवादिनो हि प्रवदन्ति नित्यम् श्वेताश्व.३ । २१
जन्मपल्वलमत्स्यानां चित्तकर्दमचारिणाम् । पुंसां दुर्वासना रज्जुर्नारी बडिशपिण्डिका याज्ञव. १५ [+ महो. ३।४६
जन्मबन्धविनिर्मुक्ताः भ.गी. २ । ५१
जन्म मायोपमं तेषां सा च माया न विद्यते अ. शां. ५८
जन्ममृत्युजरादुःखैः भगी.१४।२०
जन्म-मृत्यु-जरा-व्याधि-दुःखदोषानुदर्शनम् भ. गी. १३। ९
जन्ममृत्युसुखदुःखवर्जितं..चिद्विवर्तजगतोऽस्य कारणं, तत्सदाऽहमिति मौनमाश्रय वराहो. ३ ।७
जन्मस्थितिविनाशेषु सोदयास्तमयेषुच । सममेव मनो यस्य स जीवन्मुक्त उच्यते महो.२ । ५९
जन्मानि तव चार्जुन भ. गी. ४।५
जन्मान्तरकृतान्सर्वान्दोषान्वारयतीति तेन वारणा भवतीति रामो. ३ । १
जन्मान्तरघ्ना विषया एकजन्महरं विषम् । इति मे..चेतसि स्फुरन्ति हि न भोगाशाः महो.३।५४
जयतीमाँल्लोकान् जित इन्वसावसत् बृह. ५ । ४।१
जन्मान्तरसहस्रेषु यदा क्षीणं तु किल्बिषम् यो.शि. १।७८
जन्मान्तरशताभ्यस्ता मिथ्या संसारवासना । सा विचाराभ्यासयोगेन विना न क्षीयते क्वचित् मुक्तिको.२।१४
जन्मान्तरैश्च बहुभिर्योगो ज्ञानेन लभ्यते। ज्ञानं तु जन्मनैकेन योगादेवप्रजायते । तस्माद्योगात्परतरो नास्ति मार्गस्तु मोक्षदः यो.शि. १।५२
जन्मान्यनन्तानि विस्तीर्य भूयः शिवप्रसादाद्धृतपुण्यवेशः...न संसृतौ...प्रमज्जेत् लि. शि. ७
जन्माभावे कुतः स्थितिः ना. त्रि. २५
जन्माभावे मृतिर्न च ते. बि.५।२४

जपस्तु द्विविधः प्रोक्तो वाचिको मानसस्तथा जा. द. २। १३
जपात्सिद्धीश्वरो भवेत् कामराज. १
जपान्वितस्त्रिप्रमिताश्च शाखाश्छित्त्वा नद्याप्रानुगमार्दवानि । दलानि भक्त्या चिनुयात् १बिल्वो. १३
जपो नाम विधिवद्गुरूपदिष्टवेदाविरुद्धमन्त्राभ्यासः शाण्डि. १।२।१
जप्येनामृतत्वं च गच्छति महो. ६।८५
जबाला तु नामाहमस्मि, सत्यकामो नाम त्वमसि, सत्यकाम एव जाबालो ब्रुवीथाः छान्दो.४।४।२
जयन्तीसम्भवो वायुश्चमरो धर्मसंज्ञितः । यस्यासौ ज्वलनाभासः खड्गरूपो महेश्वरः कृष्णोप.२०
जयाजयमसन्मयम् । शब्दं सर्वमसत् ते.बि.३।५६
जयेदादौ स्वकं मनः [महो. ५।७५+ मुक्तिको.२।४२
जयोऽस्मि व्यवसायोऽस्मि भ.गी. १०।३६
जरयावोपतपतावाऽणिमानंनियच्छति बृह. ४।३।३५
जरा पालिनिका शान्तिरीश्वरी रतिकामिका । वरदा ह्लादिनी प्रीतिर्दीर्घा दश कला हरेः ना. पू.ता.५।१
जरामरणधर्माधर्मादिसाम्यदर्शनात् (न देहो ब्राह्मणः) व. सू. ४
जरामरणनिर्मुक्ताः सर्वे धर्माः स्वभावतः अ. शां. १०
जरामरणमापद्य राज्यं दारिद्र्यमेव च । रम्यमित्येव यो भुंक्ते स जीवन्मुक्त उच्यते महो. २ । ५५
जरामरणमिच्छन्तश्च्यवन्तेतन्मनीषया अ. शां. १०
जरामरणमोक्षाय भ. गी. ७।२९
जरामृत्युगदघ्नो यः खेचरीं वेत्ति भूतले । ग्रन्थतश्चार्थतश्चैव.. योगकु. २। ३
जरा मृत्युं ते पुनरेवापियन्ति मुंड. १।२।७
जरायुजाण्डजादीनां वाङ्मनःकायकर्मभिः । युक्तः कुर्वीत न द्रोहं.. ना. प. ५।४३
जरायुजा नरपशुमृगादयो जायन्ते (नारायणात्) ना. पू.ता. ५।६
जरावस्थाकाल...कारणं तत्त्वज्ञानं भवति अद्वैतो. २

जलगतसैन्धवखण्डवन्महात्मा	अ. पू. २।१६
जलतीरे केतनं हि ब्रह्मवादिनोवदन्ति	कठश्रु. ९
जलत्वेन मरीचिका। गृहत्वेन हि काष्ठानि...तद्वदात्मनि देहत्वे..	यो. शि. ४।२३
जलमिति भस्म, स्थलमिति भस्म	रुद्रोप. २
जलस्य चलनादेव चञ्चलत्वं यथा रवेः। तथाऽहङ्कार-सम्बन्धादेव संसार आत्मनः	वराहो. ३।२०
जलं वह्नौ वह्निं वायौ वायुमाकाशे.. अव्यक्तं पुरुषे क्रमेण विलीयते.. ततो..चात्माऽऽविर्भवति	पैङ्गलो. ३।३
जलूकाभाववद्यथाकाममाजायते-श्वरात्,तावताऽऽत्मानमानन्दयति	परब्र. २
जलूका रुधिरं यद्वद्बलादाकर्षति स्वयम्। ब्रह्मनाडी तथा धातून्..	यो.शि. १।१२५
जलेऽग्निज्वलनाच्छाखापल्लवानि भवन्ति हि	वराहो. ५।३६
जलेन श्रमजातेन गात्रमर्दन-माचरेत्। दृढता लघुता चापि तस्य गात्रस्य जायते	शांडि. १।७।४
जले वाऽपि स्थले वाऽपि लुठत्वेष जडात्मकः। नाहं विलिप्ये तद्धर्मैर्घटधर्मैर्नभो यथा	कुण्डिको. २४
जले सैन्धवपिण्डवत् (लीनो भवति)	२ अवधू. ७
जलोपरि समर्पितव्यञ्जनसंयुक्त-मन्नं वह्निसंयुक्तवारिणा पक्वमकरोत्	शांडि.१।४।८९
जहात्यद्दस्तु पूर्व्येषु, स्वामापो..	चित्यु. १४।२
जहात्येनां भुक्तभोगामजोऽन्यः [+महाना. ८।५+	श्वेताश्व. ४।५ ना. पू. ता.५।१
जहि शत्रुं महाबाहो	भ. गी. ३।४३
जहि शत्रूँ अपमृधो नुदस्व(परमृधो) [ऋ.अ.३।३।११=मं.३।४७।२+ [+तै.सं.१।४।४।२+	महाना. ५।११ वा.सं.७।३७ तै.आ.१०।१।११
जागतं छन्दः, द्यौः स्थानम्	२ प्रणवो. २१
(अथो खल्वाहुः) जागरितदेश एवास्यैष इति	बृह. ४।३।१४
जागरितस्थानश्चतुरात्मा विश्वो वैश्वानरश्चतूरूपोङ्कार एव	नृसिंहो. २।४
जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः (आत्मनः) [माण्डू. ३+	नृ. पू. ४।२
जागरितस्थानो वैश्वानरोऽकारः प्रथमा मात्राप्तेरादिमत्त्वाद्वा	माण्डू. ९
जागरितंस्वप्नं सुषुप्तं तुरीयं च महतां च लोकं परं च लोकं दहति	सुबालो. १५।२
जागरिते ब्रह्मा,स्वप्ने विष्णुः,सुषुप्तौ रुद्रस्तुरीयंपरमाक्षरं स आदित्यो विष्णुश्चेश्वरश्च..	ब्रह्मो. २
जागरिते ब्रह्मा स्वप्नेविष्णुः सुषुप्तौ रुद्रस्तुरीयमक्षरं चिन्मयं, तस्माच्चतुरवस्था	परब्र. ३
जागरितेसुषुप्त्यवस्थापन्नइवयद्यच्छ्रुतं यद्यदृष्टं तत्तत्सर्वमविज्ञातमिवयो वसेत्तस्य स्वप्नावस्थायामपि ताद-गवस्था भवति	ना.प. ५।१४
जागरे स्वप्नता नहि। द्वयमेव लये नास्तिलयोऽपि ह्यनयोर्न च	यो.शि. ४।११
जाग्रच्चित्तेक्षणीयास्ते नविद्यन्ते ततः पृथक्। तथा तद्दृश्यमेवेदं जाग्रत-श्चित्तमिष्यते	अ.शां. ४६
जाग्रतः प्रत्ययाभावं यस्याहुः प्रत्ययं बुधाः। यत्सङ्कोचविकासाभ्यां जाग्रत्प्रलयदृष्टयः	महो. २।१०
जाग्रतःस्वपतश्चैवप्राणायामोऽयमुत्तमः। प्रवर्तते ह्यभिज्ञस्य..	अ.पू. ५।२७
जाग्रतीं त्वासादयामि	चित्यु. १९।१
जाग्रति प्रवृत्तोजीवःप्रवृत्तिमार्गासक्तः	मं.ब्रा. २।७
जाग्रतो नैव चार्जुन	भ.गी. ६।१६
जाग्रत्काले विश्वः, स्वप्नकाले तैजसः, सुषुप्तिकाले प्राज्ञः	ना.प. ५।१२
जाग्रत्येव सुषुप्तस्थः कुरु कर्माणि.. अतःसर्वपरित्यागी बहिः कुरु..	अ. पू. ५।११६
(ॐ)जाग्रत्स्वप्नसुषुप्तितुरीयतुरीया-तीतोऽन्तर्यामी..गोपालॐभूर्भुवः सुवस्तस्मै नमोनमः	गोपालो. ३।१८

जाग्रत्स्वप्नसुषुप्तितुरीयमिति चतुर्विधा अवस्थाः — शारीरको. १०
जाग्रत्स्वप्नसुषुप्तितुरीयावस्थाभेदै- रेकैकमात्रा चातुर्विध्यमेत्य.. — तुरीयो. २
जाग्रत्स्वप्नसुषुप्तितुरीयाश्चेत्य- वस्थाश्चतस्रः — यो.चू. ७२
जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणधर्मयुक्तो घटीयंत्रवदुद्विग्नोजातो मृत इव कुलालचक्रन्यायेन परिभ्रमति — पैङ्गलो. १।५
(अथ)जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणाद्य- वस्थाः पञ्च भवन्ति — पैङ्गलो. २।७
जाग्रत्स्वप्नसुषुप्तिषुसर्वकालव्यवस्थितं — ना.उ.ता. १।९
जाग्रत्स्वप्नसुषुप्तिमूर्च्छावस्थानां... सर्वजीवभयप्रदा स्थूलदेहविस- र्जनी मरणावस्था भवति — पैङ्गलो. २।९
जाग्रत्स्वप्नसुषुप्तिष्वेकशरीरस्य जाग्र- त्काले विश्वः, स्वप्नकाले तैजसः, सुषुप्तिकाले प्राज्ञः — ना.प. ५।११
जाग्रत्स्वप्नसुषुप्त्यादि मनोमय- मितीरितम् — ते. बिं. ५।१०३
जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते, तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते — कैव. १७
जाग्रत्स्वप्नसुषुप्त्यादिष्ववस्थास्वेक- रूपिणी। ब्रह्मानन्दमयी विद्या.. — गन्धर्वो. ५
जाग्रत्स्वप्ने व्यवहरन् सुषुप्तौ क गति- र्मम। इति चिन्तापरो भूत्वा.. — योगकुं. ३।२९
जाग्रदवस्थायां जाग्रदादिचतस्रो- ऽवस्थाः (भवन्ति) [प.हं.प.९+ — ना.प. ६।६
जाग्रदवस्थायां विश्वस्य चातुर्विध्यं— विश्वविश्वो विश्वतैजसो विश्व- प्राज्ञो विश्वतुरीय इति — प. हं. प. ९
जाग्रद्वृत्तावपि त्वन्तश्चेतसा कल्पितं त्वसत्। बहिश्चेतो गृहीतं सद्युक्तं वैतथ्यमेतयोः — वैतथ्य. १०
जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः। त्रिणाचिकादि- योगान्ता ईश्वरभ्रान्तिमाश्रिताः [वराहो. २।५४+ — महो. ४।७३

जाग्रन्निन्दा- (द्रा?) तः परिज्ञानेन ब्रह्मविद्भवति — मं. ब्रा. २।६
जाग्रन्निद्राविनिर्मुक्ता सा स्वरूप- स्थितिः परा — मैत्रा. २।३०
जाग्रन्नेत्रद्वयोर्मध्ये हंसएवप्रकाशते। सकारः खेचरी प्रोक्तस्त्वंपदं चेति निश्चितम् — यो. चू. ८२
जाग्रन्मात्राचतुष्टयमकारांशं स्वप्न- मात्राचतुष्टयमुकारांशं.. अय- मेव ब्रह्मप्रणवः — प. हं. प. १०
जाड्यभावविनिर्मुक्तममलं चिन्मया- त्मकम्। तस्यातिवाहिकं मुख्यं.. — योगकुं. १।५७
जात इत्यनेन परमात्मनो जृम्भणम् — त्रि. ता. २।३
जात इत्यादिना परमात्मा शिव उच्यते — त्रि. ता. २।३
जातएवनजायते,कोन्वेनंजनयेत्पुनः। — बृह. ३।९।३४
जातमात्रेण कामी कामयते काममित्यादिना — त्रि. ता. २।३
जातमात्रेण मुनिराट् यत्सत्यं तद- वाप्तवान्। तेनासौ स्वविवेकेन.. — महो. २।१
जातरूपधरश्चरेदात्मानमन्विच्छेत् — ना. प. ३।८७
जातरूपधरश्चेन्नकन्थावेशोनाध्ये- तव्यो न श्रोतव्यमन्यत्किंचित्.. — ना. प. ५।६
जातरूपधरा निर्द्वन्द्वा निष्परिग्रहा- स्तत्त्वब्रह्ममार्गे सम्यक्सम्पन्नाः.. — याज्ञव. ३
(अथ) जातरूपधरा निर्द्वन्द्वा निष्परिग्रहाः शुक्लध्यानपरायणा आत्मनिष्ठाः...ते परमहंसा नाम — भिक्षुको. ६
जातरूपधरोभवति सः.. सन्यासी — ना. प. ५।३
जातवेद एतद्विजानीहि किमेतद्यक्षमिति — केनो. ३।३
जातवेदसमण्डलंयोऽधीतेसर्वंव्याप्यते — त्रि. ता. १।६
जातवेदसमव्यक्तंव्यक्ताव्यक्तंपरंसदा — सवानं. ५
जातवेदसे सुनवाम सोममरातो [+ऋ.अ.१.७।७ — महाना. ६।१३ =मं. १।९९।१
[वनदु. ११,११४ + — त्रि.ता. १।२
जातवेदसे सुनवामसोमंतदन्त्यम- वार्णो...महासौभाग्यमाचक्षते — त्रि. ता. २।२

जातश्च वायुना स्पृष्टो न स्मरति जन्ममरणम्। अन्ते च शुभाशुभं कर्म... प्रामाण्यम् निरुक्तो. १।८
जातश्चैव मृतश्चैव जन्म चैव पुनः पुनः। यन्मया परिजनस्यार्थे कृतंकर्मशुभाशुभम्। एकाकीतेन दह्येऽहं गतास्ते फलभोगिनः गर्भो. ५
जातस्य ग्रहरोगादि कुमारस्य...उपनीतेऽप्यविद्यत्वमनुद्ग्राहश्च पंडिते याज्ञव. १९
जातस्य हि ध्रुवो मृत्युः भ.गी. २।२७
जातं मृतमिदं देहं मातापितृमलात्मकम्।..स्पृष्ट्वा स्नानं विधीयते मैत्रे. २।५
जाताच्च जायमानस्य न व्यवस्था प्रसज्यते अ.शां. १३
जातानि जीवन्ति (भूतानि) आकाशं प्रयन्त्यभिसंविशन्ति ग. पू. २।९
जातान्यन्नेन वर्धन्ते, अद्यतेऽत्ति च भूतानि [तैत्ति. २।२+ मैत्रा. ६।१२
जाता रुद्राक्षा जलबिन्दवोऽस्य सद्योजातादीन् पञ्चवक्त्राणि विद्यात् (शिवस्य) सि.शि. १६
जातास्त एव जगति जन्तवः साधुजीविताः। ये पुनर्नेह जायन्ते शेषा जरठगर्दभाः महो. ३।१४
जातिदोषा न क्षेत्स्यन्ति दोषोऽप्यल्पो भविष्यति अ.शां. ४३
जातिर्नास्ति गतिर्नास्ति वर्णो नास्ति नलौकिकम्। सर्वंब्रह्मेति नास्त्येव ते.बिं. ५।३८
(तर्हि)जातिर्ब्राह्मण इतिचेत्, न, तत्र जात्यन्तरजन्तुष्वनेकजातिसम्भवा महर्षयो बहवः सन्ति व.सू. ५
जातिसङ्करकारकैः भ.गी. १।४३
जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा अ.शां. ४२
जातीपुष्पसमायोगैर्यथा वास्यति तैतिलम्। एवं शुभाशुभैर्भावैः सा नाडीति विभावयेत् क्षुरिको. १९
जातु कर्मण्यतन्द्रितः भ.गी. ३।२३
जातु तिष्ठत्यकर्मकृत् भ.गी. ३। ५
जातेऽग्निमुपसमाधायाङ्क आधाय (पुत्रं)क९ सं पृषदाज्य९ संनीय.. जुहोति बृह. ६।४।२५
जातो देव एक ईश्वरःपरमोज्योतिर्मैत्रतो वेत्ति तुरीयं वरं दृष्ट्वा.. त्रि.ता. २।३
जातो विश्वस्य भुवनस्य गोपी लिंगोप. १
[+ऋ.अ.२।६।८=मं.२।४०।१+ तै.सं.१।८।२२।५
जात्यन्धे रत्नविषयः सुज्ञातश्चेजगत्सदा (सत्यं) ते.बिं. ६।८९
जात्याभासं चलाभासं वस्त्वाभासं तथैव च। अजाचलमवस्तुत्वं विज्ञानं शान्तमद्वयम् अ.शां. ४५
(एतेषां) जात्याविनाऽप्यग्रे ज्ञानप्रतिपादिता ऋषयो बहवः सन्ति, तस्मान्न जातिर्ब्राह्मणः व. सू. ५
जानकीदेहभूषाय रक्षोघ्नाय शुभाङ्गिने। भद्राय रघुवीराय(नमः) रा.पू. ४।१४
जानन् कस्माच्छृणोम्यहम् १ अवधू. १६
जानन्नपि हि मेधावी जडवल्लोक आचरेत् १सं.सो.२।१०२
जानन्नेव ह्यन्यत्रान्यन्न विजानात्यनुभूतेः नृसिंहो. ९।१
(ॐ) जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायीबहुपाक्यआस छांदो. ४।१।१
जानाति पुरुषोत्तमम् भ. गी. १५।१९
जानाम्यह ९ शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत् कठो. २।१०
जानु प्रदक्षिणीकृत्य न द्रुतं न विलम्बितम्। अङ्गुलिं स्फोटनं कुर्यात्सा मात्रा परिगीयते १ यो. त. ४०
जानूर्वोरन्तरे कृत्वा सम्यक् पादतले उभे। समग्रीवशिरःकायः स्वस्तिकं नित्यमभ्यसेत् जा.द. ३+३
जानूर्वोरन्तरे सम्यक्कृत्वा पादतले उभे। ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते शांडि. १।१।१

जानौ संयमान्महातललोकज्ञानं शांडि. १।७।५२
जान्वन्तं पृथिवी ह्यंशो ह्यपां पाय्वन्तमुच्यते । हृदयांशस्तथाग्न्यंशो..धारयेत्तु सदाशिवं जा. द. ८।४–६
जाप्येनामृतत्वं च गच्छति चतुर्वे. ७
जायते निश्चयः साधो पुरुषस्य चतुर्विधः । आपादमस्तकमहं मातापितृविनिर्मितः । इत्येको निश्चयो ब्रह्मन्बन्धायास.. महो. ६।५४
जायते मृतयेलोकोम्रियतेजननायच भवसं. १।२५
जायत्येको म्रियत्येको अश्नात्येकः शुभाशुभम् । (पा.) ...
जायते म्रियते लोको म्रियते जननाय च । अस्थिराः सर्व एवेमे... महो. ३।४
जायते वर्णसङ्करः भ.गी. १।४१
जायमानं कथमजं भिन्नं नित्यं कथं च तत् । कारणाद्यद्यनन्यत्वमतः कार्यमजं यदि अ. शां. ११
जायमानाद्धि वै कार्यात्कारणं ते कथं ध्रुवम् अ. शां. १२
जायमानाद्धिवैधर्मात्कथंपूर्वंनगृह्यते अ. शां. २१
जायमानेऽमनस्कत्व उदासीनस्य तिष्ठतः । मृदुत्वं खचरत्वं च शरीरस्योपजायते अमन. २।७९
[जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते] तै.सं. ६।३।१०
जायस्व म्रियस्वेत्येतत्तृतीयस्थानं तेनासौ लोको न सम्पूर्यते छान्दो.५।१०।८
जायापूर्वरूपं, पतिरुत्तररूपं... सैषाऽदितिर्संहिता ३ऐत. १।६।८
जाया मे स्यादथ प्रजायेय बृह. १।४।१७
जायेरन्नेवास्मिञ्छाखाः प्ररोहेयुः. छान्दो. ५।२।३
जारुजानिचस्वेदजानिचोद्भिज्जानि.. यत्किंचेदं प्राणि..यच्चस्थावरंतत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं २ऐत. ५।३
जालकिक्लिन्नं पर्युषितं पूतमन्नमयाचितमसंक्लृप्तमश्नीयान्न कञ्चन याचेत सुबालो. १२।१
जालजननमन्दिरा महाविष्णोः क्रीडाशरीररूपिणी ब्रह्मादीनामगोचरा । एतांमहामायांतरन्त्येव ये विष्णुमेव भजंति, नान्येतरन्ति.. त्रि.म.ना. ४।९
जालन्धरस्तृतीयस्तु (कुम्भकः) [योगकुं. १।४१+ यो.शि. १।१०३
जालन्धरेकृतेबन्धेकंठसङ्कोचलक्षणे । नपीयूषं पतत्यग्नौ न च वायुः प्रधावति यो.चू. ५१
जालन्धरोड्डियाणश्चमूलबन्धस्तथैवच १यो.त. २६
जालेनेवखचरःकृतस्यानुफलैरभिभूयमानः परिभ्रमति मैत्रा. ३।२
जिघ्रन्वै तन्नजिघ्रति,न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽनाशित्वात् बृह. ४।३।२४
जिज्ञासार्थं शुकस्यासावास्तामेवेत्यवज्ञया । उक्त्वा बभूव जनकस्तूष्णीं.. महो. २।२२
जिज्ञासुरपि योगस्य भ.गी. ६।४४
जितात्मनः प्रशान्तस्य भ.गी. ६।७
जितात्मा विगतस्पृहः भ.गी. १८।४९
जितामेवाप्येति योजितामेवास्तमेति सुबालो. ९।३
जितेन्द्रियाणां शान्तानां जितश्वासविचेतसाम् । .. दूरदर्शनमाप्नुयात् यो.शि. ५।४६
जितेन्द्रियाय शान्ताय मन्त्रं देयमिदं महत् (सूर्यस्य) सूर्यता. १।११
जितेन्द्रियो बहिरन्तःस्नेहवर्जितः शरीरसंधारणार्थं...भैक्षमाणो ब्रह्मभूयाय भवति प.हं.प. ६
(एवं)जितेन्द्रियो भूत्वा सर्वत्र ममतामतिम् । विहाय.. वराहो. २।४
जित्वा जित्वा ततो भूर्तिं सारमेत ततो मुनिम् । अजिता च सदाभूतिः योगो. २९
जित्वा वा भोक्ष्यसे महीम् भ.गी. २।३७
जित्वा वृष्ट्यादिकं जाड्यं खेचरः स भवेन्नरः यो.शि. १।१४८
जित्वा शत्रून्भुंक्ष्व राज्यं समृद्धम् भ.गी. ११।३३
जिष्णुर्हापराजिष्णुर्भवत्यन्यतस्त्यजायी बृह. २।१।६

जिह्वयायद्रसंह्यत्तितत्तदात्मेतिभावयेत् यो. त. ७१
जिह्वया वायुमाकृष्य पूर्ववत्कुम्भ-
कादनु । शनैस्तु घ्राणरन्ध्राभ्यां
रेचयेदनिलं सुधीः योगकुं. १।३०
जिह्वयावायुमाकृष्य यः पिबेत्सततं
नरः । श्रमदाहविनिर्मुक्तोयोगी
नीरोगतामियात् जा.द. ६।२५
जिह्वया वायुमाकृष्य जिह्वामूले
निरोधयेत् । पिबेदमृतमव्यग्रं
सकलं सुखमाप्नुयात् जा.द. ६।२६
जिह्वया वायुमानीय जिह्वामूले
निरोधयेत् । यःपिबेमृदतंविद्वा-
न्सकलं भद्रमश्नुते शांडि.१।७।४७
जिह्वया वायुं गृहीत्वा यथाशक्ति
कुंभयित्वा नासाभ्यां रेचयेत्।
तेन गुल्मप्लीहज्वरपित्तक्षुधादीनि
नश्यन्ति शाण्डि.१।७।१४
जिह्वया हि रसान् विजानाति बृह. ३।२।४
जिह्वाप्रदेशे त्र्यणुकं च विद्धि मैत्रा. ७।११
जिह्वाप्रादर्शने त्रीणि दिनानि
स्थितिरात्मनः । ज्वालाया दर्शने
मृत्युर्द्विदिने भवति ध्रुवम् त्रि.ब्रा. २।१२७
जिह्वा च रसयितव्यं च नारायणः सुबालो. ६।१
जिह्वा चित्तंच खे चरति तेनोर्ध्व-
जिह्वः पुमानमृतो भवति शांडि.१।७।४३
जिह्वाऽध्यात्मं, रसयितव्यमधिभूतं,
वरुणस्तत्राधिदैवतम् सुबालो. ५।४
जिह्वामर्कटिकाक्रान्तवदनद्वार-
भीषणम् । दृष्टदन्तास्थिशकलं
नेष्टं देहगृहं मम महो.३।२९,३०
जिह्वामूलस्थितो देवि...अनलः ।
तदग्रे भास्करश्चन्द्रः...प्रतिष्ठितः प्रा. हो.२।४
जिह्वा मे मधुमत्तमा [तैत्ति.१।४।१+ ना. प. ४।४९
जिह्वामेवाप्येति यो जिह्वामेवास्तमेति सुबालो. ९।४
जिह्वाया ऊर्ध्वान्तं सरस्वती भवति शाण्डि.१।४।६
जिह्वाया रसास्वादनं घ्राणस्य
गन्धग्रहणम् ना. प. ६।३
जिह्वारसने नासिका घ्राणे उपस्थ आनं-
न्दने अपान उत्सर्गे गर्भो. १

जिह्वा रसं विजानाति हृदयं वेदये-
त्प्रियम् । मनसा साधु पश्यति इतिहा. ३
जिह्वैग्रहः, स रसेनातिग्रहेण गृहीतः बृह. ३।२।४
जिह्वां न चालयेच्चापि पाषाण
इव निश्चलः । तमः प्रस्थाप्य
रजसः सत्त्वेन... योगो. २२
जिह्वेडा, दन्तोष्ठौ सूक्तवाकः प्रा. हो. ४।३
जिह्वावास्याएकमङ्गमुदूढं,तस्यान्नरसः
परस्तात्प्रतिविहिता भूतमात्रा कौ. उ. ३।५
जीर्णकौपीनवासाः स्यान्मुण्डी नग्नो-
ऽथवा भवेत् । प्राज्ञो वेदान्त-
विद्योगी निर्ममो निरहंकृतिः ना. प. ६।३०
जीर्णवल्कलाजिनं धृत्वाऽथ त्रिकाल-
स्नानमाचरन्..ब्रह्ममार्गे सम्यक्स-
म्पन्नः.. भैक्षमाणोब्रह्मभूयायभवति प. हं. प. ६
जीर्यन्ते दानवादयः । परमेष्ठ्यपि
निष्ठावान् हीयते हरिरप्यजः महो. ३।५०
जीर्यन्ते वै दिगीश्वराः,ब्रह्मा..सर्वा
भूतजातयः, नाशमेवानुधावन्ति महो. ३।५१
जीर्यन्मर्त्यः क्वधःस्थः प्रजानन् कठो. १।२८
जीवएवदुरात्माऽसौकन्दः संसार-
दुस्तरोः । अनेनाभिहतोजन्तु-
रधोऽधः परिधावति महो. ५।९३
जीव एव सदा ब्रह्म सच्चिदानन्द-
मस्म्यहम् ते. बिं. ६।३८
जीवतस्तत्प्रजायते (रेतः) बृह. ३।९।३२
जीवति चक्षुरपेतोऽन्धान्विपश्यामः कौ. उ. ३।३
जीवति बाहुच्छिन्नोजीवत्यूरुच्छिन्न
इत्येवं हि पश्यामः कौ. उ. ३।३
जीवति वागपेतो मूकान्विपश्यामः कौ. उ. ३।३
जीवति श्रोत्रापेतो बधिरान्
विपश्यामः कौ. उ. ३।३
जीवतो यस्य कैवल्यं विदेहोऽपि
स केवलः । समाधिनिष्ठतामेत्य
निर्विकल्पो भवानघ अध्यात्मो. १६
जीवत्यूरुच्छिन्न इत्येवं हि पश्यामः कौ.उ. ३।३
जीवत्पितृकश्चेत् पितरं त्यक्त्वाऽऽत्म-
पितामहप्रपितामहानिति सर्वत्र
युग्मक्लृप्त्या ब्राह्मणानर्चयेत् ना. प. ४।३९

जीवत्वंसर्वभूतानांसर्वत्राखण्डविग्रहं।
चित्ताहङ्कारयन्तारं जीवाख्यं
त्वंपदं भजे शु.र. २।६
जीवत्वं घटाकाशमहाकाशवद्व्यव-
धानेऽस्ति । व्यवधानवशादेव हंसः
सोऽहमिति मंत्रेणोच्छ्वासनिश्श्वास-
वशेनानुसन्धानं करोति ना. प. ६।७
जीवत्वं च तथा ज्ञेयं रज्ज्वां
सर्पग्रहो यथा यो. शि. ४।१
जीवनं सर्वभूतेषु भ. गी. ७।९
जीवन्ति मृगपक्षिणः। स जीवति
मनो यस्य मननेनोपजीवति महो. ३।१३
जीवन्नेव प्रति तत्ते दधामि सहवै.४
जीवन्नेव सदा मुक्तः कृतार्थो
ब्रह्मवित्तमः। उपाधिनाशाद्ब्रह्मैव
सद्ब्रह्माप्येति निर्द्वयम् २ आत्मो. २०
जीवन्मर्त्यः क्वधस्थः
प्रजानन् (मा. पा.) कठो. १।२८
जीवन्मुक्तपदं त्यक्त्वा स्वदेहे
कालसात्कृते। विशत्यदेह-
मुक्तत्वं पवनोऽस्पन्दतामिव पैङ्गलो. ३।७
[+महो. २।६३+ मुक्तिको. २।७६
जीवन्मुक्तः स उच्यते महो.६।४९-४८
जीवन्मुक्तः सदा स्वच्छः सर्वदोष-
विवर्जितः। विरक्ता ज्ञानिन-
श्चान्ये देहेन विजिताः सदा।
तेकथंयोगिनस्तुल्यामांसपिण्डाः.. यो. शि. १।४२
जीवन्मुक्तः सरूपः स्यादरूपो
देहमुक्तिगः मुक्तिको. २।३२
जीवन्मुक्तः स विज्ञेयः पैङ्गलो. ३।७
जीवन्मुक्ता न मज्जन्ति सुखदुःख-
रसस्थिते। प्रकृतेनाथ कार्येण
किंचित्कुर्वन्ति वा न वा महो. ५।३७
जीवन्मुक्तिविदेहमुक्त्योरष्टोत्तर-
शतोपनिषदः प्रमाणम् मुक्तिको. २।१
जीवन्मुक्तो महायोगी जायते.. यो. शि. १।१५
जीवन्मुक्तो वसेत्,कृतकृत्यो भवति ना. प. ६।३
जीवभूतः सनातनः भ. गी. १५।७
जीवभूतां महाबाहो भ. गी. ७।५
जीवला न घारिषां मा ते
बन्धाम्योषधिम् प्रा. हो. १।४
जीवला नघर्षा मा ते बन्धाम्योषधिं
(पाठः) प्रा. हो. १।४
जीववाचि नमो नाम चात्मा-
रामेति गीयते रा. पू. ४।१
जीवस्तिष्ठति संशान्तो ज्वलन्मणि-
रिवात्मनि अ. पू. २।११
जीवस्य तण्डुलस्येव मलं सहज-
मप्यलम्। नश्यत्येव न सन्देह-
स्तस्मादुद्योगवान्भवेत् महो. ५।१८६
जीवस्य निलयःप्राणोजीवोहंसस्य
चाश्रयः। हंसः शक्तेरधिष्ठानं.. वराहो. ५।५४
जीवं कल्पयते पूर्वं ततो भावान्
पृथग्विधान्। बाह्यानाध्यात्मि-
कांश्चैव यथाविद्यस्तथा स्मृतिः वैतथ्य. १६
जीवःपञ्चविंशकः स्वकल्पितचतु-
र्विंशतितत्त्वंपरित्यज्यषड्विंशः
परमात्माहमिति निश्चयाज्जीव-
न्मुक्तो भवति मं.ब्रा. १।५
जीवः शिवः शिवो जीवः स जीवः
केवलःशिवः। तुषेणबद्धोव्रीहिः
स्यात्तुषाभावेन तण्डुलः स्कन्दो. ६
जीवाक्षरेणैव जीवाहराप्नोति १ऐत. ३।८।६
जीवाख्यं त्वम्पदं भजे शु.र. २।६
जीवात्मनः परस्यापि यथैवमुभयो-
रपि। अहमेवपरंब्रह्म ब्रह्माह-
मिति संस्थितिः त्रि.ब्रा. २।१६१
जीवात्मनोरनन्यत्वमभेदेनप्रशस्यते।
नानात्वं निन्द्यते यच्च तदेवं हि
समञ्जसम् अद्वैत. १३
जीवात्मनोः पृथक्त्वं यत्प्रागुत्पत्तेः
प्रकीर्तितम्। भविष्यद्वृत्त्यागौणं
तन्मुख्यत्वं हि न युज्यते अद्वैत. १४
जीवापेतं वाव किलेदं म्रियते
न जीवो म्रियते छान्दो. ६।११।३
जीवाभिमानेनक्षेत्राभिमानः, शरीरा-
भिमानेन जीवत्वम् ना.प. ६।७
जीवाम केन क्व च सम्प्रतिष्ठाः श्वेताश्व. १।१

जीवाह्वा जीवाक्षरमित्यनकाममारः १ऐत. ३।८।६
जीवाःपशवउक्ताः,तत्पतित्वात्पशुपतिः जाबाल्यु. ३
जीविष्यामो यावदीशिष्यसि त्वं
वरस्तु मे वरणीयः स एव कठो. १।२७
जीवितं तस्य शोभते। योऽन्त-
श्शीतलयाबुद्ध्यारागद्वेषविमुक्तया।
साक्षिवत्पश्यतीदंहि.. [१सं.सो. २।३९-४१
जीवितंवापिचञ्चलम्। विहायशास्त्र-
जालानि यत्सत्यंतदुपास्यताम् पैङ्गलो. ४।१७
जीवेश्वरप्रकृतयोनित्याश्चानादय-
स्त्रयः। विश्वकारणभूताश्च.. भवसं. २।१
जीवेश्वरादिरूपेण चेतनाचेतना-
त्मकम्। ईक्षणादिप्रवेशान्ता
सृष्टिरीशेनकल्पिता [महो.४।७३+ वराहो. २।५३
जीवेश्वरेति वाक्चेति वेदशास्त्राद्यहं
त्विति। इदंचैतन्यमेवेति.. इति
निश्चयशून्योयोवैदेहीमुक्तएवसः ते.बिं. ४।४६
जीवोऽपि जाग्रत्स्वप्नप्रपञ्चे व्यवहृत्य
..अज्ञानं प्रविश्य स्वानंदं भुङ्क्ते पैङ्गलो.२।८
जीवोऽपि न स्पृष्ट इति चेत्, न;
जीवाभिमानेन क्षेत्राभिमानः,
शरीराभिमानेन जीवत्वम् ना. प. ६।६
जीवो ब्रह्मेति वाक्यार्थं यावदस्ति
मनःस्थितिः। ऐक्यं तत्त्वं लये
कुर्वन् ध्यायेदसिपदं ततः शु. र. २।७
जीवोब्रह्मणइतिचेत्, तन्न; अतीताना-
गतानेकदेहानांजीवस्यैकरूपत्वात् व. सू. ३
जीवेश्वरौ भिन्नरूपाविति प्राथ-
मिको भ्रमः अ. पू. १।१३
जीवेश्वरौ मायिकौ विज्ञाय सर्वविशेषं
नेति नेतीति विहाय यदवशिष्यते
तदद्वयं ब्रह्म अद्वयता. २
जुष्टं यदा पश्यत्यन्यमीशं यस्य
महिमानमिति वीतशोकः श्वेता. ४।७
[मुण्ड. ३।१।२+
जुह्वति ज्ञानदीपिते भ. गी. ४।२७
जेनातिर्जेनातियां जेनातिरोजो
बलमाहरस्तत्स्वाद्मकं... तस्मै
सूक्ष्मसूक्ष्माय तेजसे स्वाहा पारमा. १०।९

जोषयेत्सर्वकर्माणि भ. गी. ३।२६
ज्यायसी चेत् कर्मणस्ते भ. गी. ३।१
ज्यायान्पृथिव्या ज्यायानन्तरिक्षात्
..ज्यायान्दिवो ज्यायानेभ्यो
लोकेभ्यः (आत्मा) छान्दो.३।१४।३
ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति बृह. ६।१।१
ज्येष्ठश्च ह वै श्रेष्ठश्च भवति, प्राणो
वाव ज्येष्ठश्च छान्दो. ५।१।१
ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य
हुत्वा मन्थे सम्पातमवनयेत् छान्दो. ५।२।४
ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नौ
हुत्वा मध्ये स‍ऽस्रवमवनयति बृह. ६।३।२
ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमापोऽहम्.. अ. शिरः.१।१
ज्योग्जीवति महान्प्रजया पशुभिर्भवति छां. २।११।२
[+छान्दो. २।१२।२+—१७।२।१८
ज्योतिरन्नादम्, अप्सु ज्योतिः
प्रतिष्ठितम् तैत्ति. ३।८
ज्योतिरहं विरजा विपाप्मा भूयासम् लिङ्गोप. १
[म. ना. १४।७—१४।१९
ज्योतिरिति नक्षत्रेषु, प्रजातिरमृतं.. तैत्ति. ३।१०।३
ज्योतिर्ज्वलति ब्रह्माहमस्मि,योहमस्मि
ब्रह्माहमस्मि अहमस्मि ब्रह्मा.. महाना. ६।७
ज्योतिर्मयं तदन्तं स्यादवाच्यं बुद्धि-
सूक्ष्मतः। ददृशुर्ये महात्मानो
यस्तं वेद स वेदवित्। यो. चू. ८१
ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं
ध्यायेत्सदा यतिः ब्र. वि. ८०
ज्योतिर्वा पारमात्मिकं सार्वं...
पराय ईशिषे स्वाहा पारमा. १।३
ज्योतिर्वाऽन्नं, वायुरन्नादः,वायुर्वाऽन्नं.. सुबालो. १४।१
ज्योतिर्विदं त्वासादयामि चित्यु. १९।१
ज्योतिश्च वायुश्चान्नादमेताभ्यां
हीदं सर्वमन्नमत्ति १ऐत. ३।१।२
ज्योतिषामपि तज्ज्योतिः
[यो.शि.३।२७+ भ. गी. १३।१८
ज्योतिषामा ज्योतिरानन्दयत्येव-
मेव तत्परं यच्चित्तं परमात्मान-
मानंदयति परब्र. २

ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः मुण्ड. २।२।९
ज्योतिषां ज्योतिरस्म्यहं, तमसः साक्ष्यहं.. ब्र.वि. ९५
ज्योतिषां रविरंशुमान् भ. गी. १०।२१
ज्योतिष्कामो ज्योतिरानन्दयते भूयस्तेनैव स्वप्नाय गच्छति ब्रह्मो. १
ज्योतिष्कृदसि सूर्य। विश्वमाभासि.. चित्स्यु. १६।१ [ऋ. अ. १।४।७=मं.१।५०।४+ अथर्व. १३।२।१९+२०।४७।१६+ वा.सं.३३।३६ तै. सं. १।४।३१।१
ज्योतिष्कृतं त्वासादयामि चित्स्यु. १९।१
ज्योतिष्पश्यन्ति उत्तरम् छांदो. ३।१७।७ [ऋ. अ. १।४।८ =मं. १।५०।१०
ज्योतिष्मतीं त्वासादयामि चित्स्यु. १९।१
ज्योतिष्मतो ह लोकाञ्जयति छांदो. ४।७।४
ज्योतिष्मंतस्त्रयः कालास्तिस्रोऽवस्थास्त्रय आत्मनः वासुदे. ४
ज्योतिष्मद्भ्राजमानं महस्वत्[+सुदर्श.५ त्रि.म.ना.७।३ [तै. ब्रा. ३।१२।३।४
ज्योतिष्मानस्मिँल्लोके भवति छांदो. ४।७।४
ज्योतिष्यापः प्रतिष्ठिताः तैत्ति. ३।८
ज्योतिस्स्वरूपं लिङ्गं मामेवोपासितव्यं सदेवोपासितव्यम् भस्मजा. २।९
ज्योतीरूपमशेषबाह्यरहितं देदीप्यमानं परं तत्त्वं तत्परमस्ति.. शाण्डि.१।७।१६
ज्वलतामति (ज्वलना अपि) दूरेऽपि सरसा अपि नीरसाः। स्त्रियो हि नरकाग्नीनामिन्धनं चारु दारुणम् [महो. ३ । ४४+ याज्ञव. १३
ज्वलति स उद्गीथः, अङ्गारा भवन्ति स प्रतिहारः छान्दो.२।१२।१
ज्वलत्त्वात्सर्वतोमुखत्वान्नृसिंहत्वात् भीषणत्वाद्भद्रत्वात्..(नृसिंहः) नृसिंहो. ७ । ५
ज्वलनो ज्वालाभिः प्राणेन कोष्ठमध्यगतंजलमत्युष्णमकरोत् शाण्डि. १।४८
ज्वलन्तमभिमुत्सृज्य नहि भस्मनि हूयते इतिहा. ४५
ज्वलन्तमज्वलन्तं सर्वतोमुखमसर्वतोमुखं नृसिंहमनृसिंहं....आत्मानं ....जानीयात् नृसिंहो. ६ ।१
ज्वलन्तमित्याह—ज्वलन्निव खल्वसाववस्थितः अव्यक्तो. ३
ज्वलन्तं न प्रदीपं च स्वयं निर्वापयेद्बुधः शिवो. ७।७१
ज्वलतः पावकाद्यद्वत्.. स्फुलिङ्गाः कोटिकोटिशः।..विश्वं तस्यास्तथा गुह्यका. २८
ज्वलन्तीं त्वासादयामि चित्स्यु. १९। १
ज्वलतोऽपि यथा बिन्दुः सम्प्राप्तश्च हुताशनम्। व्रजत्यूर्ध्वं गतः शक्त्या निरुद्धो योगमुद्रया यो. चू. ५९
ज्वलिष्याम्येवाहमित्यग्निर्दध्रे बृह.१।५।२२..
ज्वालाजालपरिस्पन्दो दग्धेन्धन इवानलः। उदितोऽस्तंगतइव ह्यस्तंगत इवोदितः अ. पू.३।११
ज्वालामालाकुलं भाति विश्वस्यायतनं महत्।... तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम् महाना. ९। २७
ज्वालाया दर्शने मृत्युर्द्विदिने भवति ध्रुवम् (आयुश्चिह्नम्) त्रि. ब्रा. १२७
ज्वालावह्निः शीतलश्चेदस्तिरूपमिदं जगत् ते. बिं. ६।८४
ज्वालाग्निमण्डले पद्मवृद्धिश्चेज्जगद्वस्त्विदम् ते. बिं. ६।८४

ज्ञ

ज्ञपयते स प्रस्तावः छान्दो.२।१३।१
ज्ञप्तिर्हि ग्रन्थिविच्छेदस्तस्मिन् सति विमुक्तता महो. ५।४०
ज्ञमनो नाशमभ्येति मनो ज्ञस्य हि शृङ्खला मुक्तिको.२।३९
ज्ञविज्ञसम्यग्ज्ञालम्बंनिरालम्बंहरिंभजे निरा. शीर्षकं
ज्ञः कालकालो गुणी सर्वविद्यः। तेनेशितं कर्म विवर्ततेह श्वेता. ६।२
ज्ञः सर्वगो भुवनस्यास्य गोप्ता। यईशेऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यते ईशनाय श्वेता. ६।१७

ज्ञाज्ञौद्वावजावीशानीशावजाह्येका भोक्तृभोगार्थयुक्तां । अनंतश्चात्माविश्वरूपोह्यकर्तात्रयं यदा विन्दते ब्रह्ममेतत् [तेनेदंसृष्टं ब्रह्मचक्रंहिसर्वम् ।][श्वेता.१।९।ना.प५।८ भवसं.२।३
ज्ञातचरदेशं चण्डालवाटिकामिव स्त्रियमहिमिव (त्यजेत्) ना.प. ७।१
ज्ञातज्ञेयास्त उच्यन्ते जीवन्मुक्ता महाधियः । पदार्थभावनादाढर्थं बन्ध इत्यभिधीयते महो. २।४०
ज्ञातव्यमवशिष्यते भ.गी. ७।२
ज्ञातं येन निजं रूपं कैवल्यं परमं पदम् । असौ दोषैर्विनिर्मुक्तः.. यो.शि. १। १५
ज्ञातं येन निजं रूपं कैवल्यं परमं पदं निष्कलं निर्मलं शान्तं.. एतज्ज्ञानमिति प्रोक्तम् १यो.त.१७,१८
ज्ञाता चिन्मात्ररूपश्च सर्वंचिन्मयमेव हि । संभाषणं च चिन्मात्रं.. ते.बिं. २।२९
ज्ञातानुज्ञात्रननुज्ञातृविकल्पज्ञानसाधनम् । विकल्पत्रयमत्रापि.. मायामात्रं विदित्वैवं.. ना.प. ८।२०
ज्ञाता होता ज्ञानमग्निः,ज्ञेयं हविः भावनो. ३
ज्ञातुं द्रष्टुं च तत्त्वेन भ.गी. ११।५४
ज्ञातृज्ञानज्ञेयानामभेदभावनं श्रीचक्रपूजनम् भावनो. २
ज्ञातृज्ञानज्ञेयानामाविर्भावतिरोभावज्ञाता स्वयमाविर्भावतिरोभावरहितः स्वयञ्ज्योतिः साक्षीत्युच्यते सर्वसारो. ५
ज्ञातृत्वं समानयोगेन श्रोत्रद्वारा शब्दगुणो वागधिष्ठित आकाशे तिष्ठति.... त्रि.ब्रा. १।६
ज्ञाते द्वैतं न विद्यते आगम. १८
ज्ञातोऽज्ञातश्चेति होचुर्न चैनामिति होचुः नृसिंहो. ९।१०
ज्ञातोनैषविज्ञातोविदिताविदितात्परः नृसिंहो. ९।८
ज्ञात्वा (नारायणं) जीवन्मुक्तो भवति ना.पू.ता. १।१
ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान् महाना.१७।१४
ज्ञात्वा (शिवमात्मानं) तं मृत्युमत्येति, नान्यः पन्था विमुक्तये कैव. ९
ज्ञात्वा तां (देवीं) मृत्युपाशाञ्छिनत्ति गुह्यका. ५८
ज्ञात्वा त्रिविधमात्मानं परमात्मानमाश्रयेत् । रुद्रहृ.१२
ज्ञात्वादेवं मुच्यते सर्वपाशैः [श्वेता. १।८+२।१५+[४।१६+५।१३+६।१३ ना.प. ९।७।१०
ज्ञात्वा देवं सर्वपाशापहानिः श्वेता. १।११
ज्ञात्वा भूतादिमव्ययम् भ. गी. ९।१३
ज्ञात्वा मां शांतिमृच्छति भ. गी. ५।२९
ज्ञात्वा (मृत्युं) यतेत कैवल्यप्राप्तये त्रि.ब्रा.२।१२२
ज्ञात्वा शास्त्रविधानोक्तं भ. गी.१६।२४
ज्ञात्वा शिवं शान्तिमत्यन्तमेति श्वेताश्व. ४।१४
ज्ञात्वा शिवं सर्वभूतेषु गूढं विश्वस्यैकं परिवेष्टितारं ज्ञात्वादेवं मुच्यते सर्वपाशैः श्वेता. ४ । १६
ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् । सोऽहमित्येव तद्वृत्त्या स्वान्यत्रात्मगतिं त्यजेत् अध्यात्मो. २
ज्ञात्वैवं (ब्रह्मैवाहं) मनोदण्डं धृत्वा आशानिवृत्तो भूत्वा भ्रमरकीटन्यायेन मुक्तो भवति ना. प. ५२
ज्ञानकर्मेन्द्रियैर्ज्ञानविषयैःप्राणादिपञ्चवायुमनोबुद्धिभिश्च स्थूलकल्पितैः सोऽपि स्थूलप्रकृतिरित्युच्यते यो. चू. ७२
ज्ञानतोऽज्ञानतो वापि पठतां बन्धमोचकम् ।..इदमष्टोत्तरशतं न देयं यस्यकस्यचित् मुक्तिको.१।४६
ज्ञानदण्डा ज्ञानशिखा ज्ञानयज्ञोपवीतिनः । शिखा ज्ञानमयीयस्य.. शाट्याय. १६
ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते [ना.प. ५।१३+ प. हं. ५
ज्ञानदीपेन भास्वता भ. गी.१०।११
ज्ञाननिर्धूतकल्मषाः भ. गी. ५।१७
ज्ञाननिष्ठो विरक्तोऽपि धर्मज्ञो विजितेन्द्रियः । विना देहेन योगेन न मोक्षं लभते.. यो.शि.१।२४
ज्ञाननेत्रं समाधायसमहत्परमं पदम् । ..शान्तं ब्रह्माहमिति संस्मरेत् त्रि.ता. ५।२०

ज्ञाननेत्रं समादाय चरेद्वह्निमतः परम् । निष्कलं निर्मलं शान्तं तद्ब्रह्माहमिति स्मृतम्	ब्र. बिं. २१
ज्ञानपूतं त्रिगुणस्वरूपं त्रिमूर्तित्वं पृथग्विज्ञाय मूलमेकं सत्यं मृण्मयं विज्ञातं स्यात्..	परब्र. ४
ज्ञानप्रबोधो यस्मिन् समये माया-मोहं सशब्दातीतोऽपिज्ञायते	अद्वैतो. २
ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः (ततस्तु तां पश्यते निष्कलां च) [मुण्ड. ३।१।८+	गुह्यका. ३७
ज्ञानबलैश्वर्यशक्तितेजस्स्वरूपो भवति (नारायणः)	त्रि.म.ना. २।६
ज्ञानमावृत्य देहिनम्	भ. गी. ३।४
ज्ञानभूमिः शुभेच्छाख्या प्रथमा...	महो. ५।२४
ज्ञानभूमिः शुभेच्छा स्यात् ... सप्तमी तुर्यगा स्मृता	वराहो. ४।१,२
ज्ञानमेव परं तेषां पवित्रं ज्ञान-मुच्यते (ईरितं) [ब्रह्मो.११+	परब्र. ६।१३
ज्ञानयज्ञः परन्तप	भ. गी. ४।३३
ज्ञानयज्ञः स विज्ञेयः सर्वयज्ञोत्तमो-त्तमः (पूर्वोक्तः)	शाट्याय. १६
ज्ञानयज्ञेन चाप्यन्ये	भ. गी. ९।१५
ज्ञानयज्ञेन तेनाहं	भ.गी. १८।७०
ज्ञानयुक्तयमाद्यष्टाङ्ग..योग उच्यते	मं. ब्रा. १।१
ज्ञानयोगनिधिं विश्वगुरुं योगिजन-प्रियम् । भक्तानुकंपिनं सर्व-साक्षिणं..एवं यः सततं ध्यायेद्देव-देवं..स मुक्तः	शांडि. ३।४
ज्ञानयोगपराणां तु पादप्रक्षालितं जलम् । भावशुद्ध्यर्थमज्ञानां तत्तीर्थं मुनिपुङ्गव	जा. द. ४।५९
ज्ञानयोगविनिर्मुक्तः कर्मयोगसमा-वृतः । मृतः शिवपुरं गच्छेत्ततः..	शिवो. १।२९
ज्ञानयोगव्यवस्थितिः	भ.गी. १६।१
ज्ञानयोगं न विन्दंति ये नरा मन्दबुद्धयः । ते मुच्यन्ते कथं..	शिवो. १।३
ज्ञानयोगः कर्मयोग इति योगो द्विधा मतः	त्रि. ब्रा. २।२३
ज्ञानयोगः स विज्ञेयः सर्व--सिद्धिकरः शिवः	त्रि. ब्रा. २।२६
ज्ञानयोगेनमुच्यन्ते देहपातादनन्तरम् भोगान् भुक्त्वा च मुच्यन्ते..	शिवो. १।३१
ज्ञानयोगेन साङ्ख्यानां	भ. गी. ३।३
ज्ञानरूपमानन्दमयमासीत् (पुरेदं ब्रह्मांडं)	अव्यक्तो. १
ज्ञानवान् मां प्रपद्यते	भ.गी. ७।१९
ज्ञानविज्ञानतृप्तात्मा	भ. गी. ६।८
ज्ञानविज्ञाननाशनम्	भ. गी. ३।४१
ज्ञानवैराग्यमृत्तोयैः क्षालनाच्छौच-मुच्यते	मैत्रे. २।९
ज्ञानवैराग्ययुक्तो वित्तस्त्रीपराङ्मुखः.. शरीररक्षणार्थं.. भैक्षमाणो ब्रह्मभूयाय भवति	प. हं. प. ६
ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्य-शेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः	भवसं. २।५२
ज्ञानशक्तिश्चेतनाशक्तिः क्षेत्रशक्ति-रिच्छान्तर्भूत्वा माया सत्त्व-रजस्तमोमयी	राधिको. ९
ज्ञानशिखिनो ज्ञाननिष्ठा ज्ञानयज्ञोप-वीतिनः । ज्ञानमेव परंतेषां पवित्रं ज्ञानमीरितम्(उच्यते)[ब्रह्मोप.११ [+ना. प. ३।८३	+परब्र.१३
ज्ञानशौचं परित्यज्य बाह्ये यो रमते नरः ।..लोष्ठं गृह्णाति सुव्रत	जा. द. १।२२
ज्ञानसङ्कल्पनिश्चयानुसन्धानाभिमाना आकाशकार्यान्तःकरणविषयाः	त्रि. ब्रा. १।४
ज्ञानसङ्गेन चानघ	भ. गी. १४।६
ज्ञानसञ्छिन्नसंशयम्	भ. गी. ४।४१
ज्ञानसंहारसंयुक्तंशक्तिद्वयसमन्वितम्	पञ्चब्र. ७
ज्ञानस्वरूपमेवाग्रे ज्ञानं ज्ञेयैक-साधनम् । ज्ञातंयेननिजंरूपंकैवल्यं..	१यो. त. १६
ज्ञानस्वरूपमेवादौ ज्ञेयं ज्ञानैक-साधनम् । अज्ञानं कीदृशं चेति प्रविचार्य..	यो. शि. १।१४

ज्ञानस्वरूपमेवाहुर्जगदेतद्विलक्षणम् । अर्थस्वरूपमज्ञानात्पश्यन्त्यन्ये कुदृष्टयः	जा. द. ६।४९
ज्ञानं कर्म च कर्ता च	भ. गी.१८।१९
ज्ञानं केचिद्वदन्त्यत्र केवलं, तन्न सिद्धये । योगहीनं कथं ज्ञानं मोक्षदं भवतीह भोः	यो. शि. १।१२
नावेव सिन्धुं दुरितात्यग्निः महाना. ६।१३ [+ऋ. अ. १।७।७=मं. १।९९।१+ त्रि. ता. १।२
नावैष्णवो व्रजेन्मुक्तिं बहुशास्त्रयुतोऽपि वा। वैष्णवोवर्णहीनोपि याति.. भवसं. ५।२३
नाशप्रायं सुखाद्धीनं (दृश्यमानं) वैतथ्य. ३२
नाशयाम्यात्मभावस्थः भ.गी.१०।११
नाशुचित्वं न चोच्छिष्टं तस्य सूत्रस्य धारणात्। परब्र. १२
नाशौचं नाग्निकार्यं च न पिण्डं नोदकक्रिया। न कुर्यात्पार्वणादीनि ब्रह्मभूताय भिक्षवे पैङ्गलो. ४।६
नाश्रद्दधन् मनुते श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्या छांदो.७।१९।१
नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति सहवै. १९
नासच्छास्त्रेषु सज्जेत...अतिवादांस्त्यजेत्तर्कान् पक्षं कञ्चन नाश्रयेत् ना. प. ५।३३
नासतो विद्यते भावः भ.गी. २।२६
नास्नं शयनं पानं.. सोपानत्कः प्रकुर्वीत शिवपुस्तकवाचनम् शिवो. ७।८७
नासंवत्सरवासिने ब्रूयात्-इत्याचार्याः ३ऐत. २।६।४
नासाग्रधारणाद्वापि जितो (वायुः) भवति.. जा.द. ६।२३
नासाग्रे अच्युतं विद्यात् तस्यान्ते तु परं पदम् ब्र. वि. ४२
नासाग्रे चित्तसंयमादिन्द्रलोकज्ञान शांडि.१।७।५२
नासाग्रे चैव हृन्मध्ये...स्रवन्तममृतं पश्येत्... वराहो. ५।३२
नासाग्रे (प्राणानां) धारणाद्दीर्घमायुः स्याद्देहलाघवम् त्रि. ब्रा.२।११
नासाग्रे वायुविजयं भवति शांडि.१।७।४५
नासाग्रे शशभृद्बिम्बे.. स्रवन्तममृतं पश्येन्नेत्राभ्यां सुसमाहितः जा. द. ९।६
नासादि केशान्तमूर्ध्वपुण्ड्रं विष्णोः कात्याय. १
नासामेवाप्येति योनासामेवास्तमेति सुबालो. ९।३
नासादिकेशपर्यन्तमूर्ध्वपुण्ड्रं तु धारयेत् [यज्ञोप. २+ सुदर्श. २
नासादिकेशान्तमूर्ध्वपुण्ड्रं विष्णोः.. चरणद्वयाकृति नारदो. १
नासाऽध्यात्मं, घ्रातव्यमधिभूतं, पृथिवी तत्राधिदैवतं... सुबालो. ५।३
नासाभ्यन्तरचारिणौ भ.गी. ५।२७
नासाभ्यां वायुमाकृष्य नेत्रद्वंद्वे निरोधयेत्..नेत्ररोगा विनश्यन्ति जा. द. ६।३०
नासाभ्यां वायुमाकृष्य... प्रत्याहारः समाख्यातः जा.द.७।१०,४
नासिकाग्रे चतुर्भिः षड्भिरष्टभिर्दशभिर्द्वादशभिः क्रमादङ्गुलान्ते... स तु योगी भवति अद्वयता. ३
नासिकापुटमङ्गुल्या पिधायैकेन मारुतम्।.. शब्दमेव विचिन्तयेत् अ. ना. २०
नासिकाभ्यां प्राणः, प्राणाद्वायुः... २ ऐत. १।४
नासिके एवोक्थं, यथाऽन्तरिक्षं तथा १ ऐत. १।२
नासिकोत्तरवेदिः (शारीरयज्ञस्य) प्रा. हो. ४।२
नासीराममेवाप्येति यो नासीराममेवास्तमेति सुबालो. ९।९
नासौ(योगी)मरणमाप्नोति पनर्योगबलेन तु.. मृतस्य [illegible] कुतः यो. शि. १।४५
नास्तमेति न चोदेति नोत्तिष्ठति न तिष्ठति (चित्) महो. ५।१०२

नास्ति काकमतादन्यदभ्यासाख्य-
मतः परम् । तेनैव प्राप्यते मुक्तिः यो.शि.१।१४४
नास्ति चित्तं न चाविद्या.. ब्रह्मैवैक-
मनाद्यन्तमब्धिवत्प्रविजृम्भते अ.पू. ५।१०
नास्ति दृष्टान्तिकं सत्ये नास्ति दार्ष्टा-
न्तिकं ह्यजे ते. बिं. ५।२९
नास्ति देहसमः शोच्यो नीचो गुण-
विवर्जितः । कलेवरमहङ्कार-
गृहस्थस्य महागृहम् महो. ३।२७
नास्ति धर्मसमं मित्रं शिवो. ६।१६७
नास्ति धर्मसमः सखा शिवो. ११६७
नास्ति नादात्परो मन्त्रो न देवः
स्वात्मनः परः । यो.शि. २।२०
नास्ति नास्ति जगत्सर्वं
गुरुशिष्यादिकं नहि प. वा. र.४
नास्ति नास्ति विमुक्तोऽस्मि नकार-
रहितोऽस्म्यहम् मैत्रे. ३।१९
नास्ति निर्मनसः क्षतिः महो. ४।९७
नास्ति पातो लयस्थानां
महातत्त्वेऽपि वर्तिनाम् अमन. २।८३
नास्ति पुत्रः समृद्धानां विचित्रं
धातृचेष्टितम् भवसं. १।१२
नास्ति बुद्धिरयुक्तस्य भ. गी.२।६६
नास्ति माया च वस्तुतः पा. ब्र. ४९
नास्ति यस्य शरीरं वा जीवो वा.. ते. बिं. ५।१०
नास्ति सत्तातिरेकेण नास्ति माया च.. पा. ब्र. ४९
नास्त्यकृतः कृतेन मुण्ड.१।२।१२
नास्त्यनात्ममयं जगत् महो. ६।१०
नास्त्यसद्धेतुकमसत् सदसद्धेतुकंतथा अ. शां. ४०
नास्त्यसावाश्रयाभावात् महो. २।८
नास्त्यन्तो विस्तरस्य मे १०।१९
नास्त्येषा परमार्थेन (माया) महो. ५।११२
नास्यावरपुरुषाः क्षीयन्ते [छांदो. ४।११।२
नास्य केन च कर्मणा लोको मीयते कौ.त. ३।१
नास्य जरयैतज्जीर्यति छांदो. ८।१।५
नास्य तावल्लोको जीर्यते यावदेतयोर्न..
अन्तरिक्षस्य च वायोश्च १ऐत. १।७।३
नास्य तावल्लोको जीर्यते..
अपां च वरुणस्य च १ऐत. १।७।६

नास्य तावल्लोको जीर्यते यावदेतयोर्न
जीर्यते पृथिव्याश्चाग्नेश्च १ऐत. १।७।२
नास्य तावल्लोको...यावदेतयोर्न
जीर्यते दिवश्चादित्यस्य च १ऐत. १।७।४
नास्य तावल्लोको जीर्यते यावदेषां
न जीर्यते दिशां च चन्द्रमसश्च १ऐत.१।७।५
नास्यान्नं क्षीयते य एवं वेद बृह. २।१।२
नास्य (यतेः) नक्तं न वा दिवा कठश्रु. १०
नास्यपापंचनचक्षषो मुखान्नीलं वेत्ति कौ. त. ३।१
नास्य प्रजा पुराकालात्प्रवर्तते कौ. त. ४।६
नास्य प्रजा पुराकालात् प्रमीयते कौ.त. ४।१३
नास्य प्रजा पुराकालात् सम्मोहमेति कौ. त.४।१२
नास्य स्वाम्येण स्वामाः, घ्नन्ति त्वेवैनं छां.८।१०।२
नास्याब्रह्मवित् कुले भवति [मुण्ड.३।२।९ +माण्डू.१०
नास्याश्च कश्चिज्जनिता न चाधिपः गुह्यका. ६८
नास्वादयेत्सुखं तत्र निस्सङ्गःप्रज्ञया
भवेत् । निश्चलं निश्चरच्चित्तं.. अद्वैत. ४५
नाहङ्कारात्परो रिपुः महो. ३।१६
नाहमत्र भोग्यं पश्यामि
[छान्दो.८।९।२+८।१०।२+ ८।११।२
नाहमस्मि न चान्योऽस्ति न चायं
न च नेतरः अ. पू.२।४
नाहमस्मि न चान्योऽस्मि
देहादिरहितोऽस्म्यहम् मैत्रे. ३।८
नाहमस्मि न सोऽस्म्यहम् ते. बिं. ३।४
नाहमेतत्कर्म प्राज्ञासिषमिति कौ. त. ३।७
नाहमेतत्सुखं दुःखं प्राज्ञासिषमिति कौ. त. ३।७
नाहमेतद्रूपं प्राज्ञासिषम् कौ. त. ३।७
नाहमेतद्वेद तात यद्गोत्रस्त्वमसि छांदो. ४।४।२
नाहमेतन्नाम प्राज्ञासिषम् कौ. त. ३।७
नाहमेतमन्नरसं प्राज्ञासिषमिति कौ. त. ३।७
नाहमेतमानन्दं रतिं प्रजातिं प्राज्ञा-
सिषमिति नहि प्रज्ञापेतो पादा-
वित्यां कांचन प्रज्ञापयेताम् कौ. त. ३।७
नाहमेतं गन्धं प्राज्ञासिषमिति नहि
प्रज्ञापेतं चक्षूरूपं किञ्चन प्रज्ञापयेत् कौ. त. ३।७
नाहमेतं शब्दं प्राज्ञासिषमिति हि
प्रज्ञापेता जिह्वान्नरसं कञ्चन प्रज्ञापयेत् कौ. त. ३।७

नाहमेतामित्यां प्राज्ञासिषमिति नाहि
प्रज्ञापेता धीः काचन सिद्ध्येत् कौ. त. ३।७
नाहमेनाननुपतस्थिरद्धा वा. मं. ६
नाहमेभिर्विना किञ्चिन्नमयैते विना.... महो. ६।४१
नाहमेवं ब्रवीमि ब्रवीमीति होवा-
चान्यो ह्यन्यस्मिन्प्रतिष्ठितः छांदो.७।२४।२
नाहं कर्ता च भोक्ता च न बोध्यो
न च बाधकः अक्ष्युप. २४
नाहं कर्ता नैव भोक्ता प्रकृतेः
साक्षिरूपकः सर्वसारो. ९
नाहं कर्ता बन्धमोक्षौ कुतो मे सर्वसारो. १२
नाहंकर्तेश्वरःकर्ता कर्म वा प्राक्तनं मम अक्ष्युप. २८
नाहं खल्वयमेवꣳ सम्प्रत्यात्मानं
जानात्ययमहमस्मीति [छांदो. ८।११।१,२
नाहं चेतः शोकमोहौ कुतो मे सर्वसारो. १२
नाहं तद्भगवन्वेद यत्र गमिष्यामीति बृ. उ.४।२।१
नाहंत्वामपहायपरागामिति [कठरु.२+ कठश्रु. १८
नाहं दुःखी न मे देहो बन्धः को-
ऽस्यात्मनि स्थितः महो. ४।१२६
नाहं देहो जन्ममृत्यू कुतो मे सर्वसारो. १२
नाहं देहो न च प्राणो नेन्द्रियाणि
मनो नहि जा.द. १०।४
नाहं न चान्यदस्तीह ब्रह्मैवाऽस्मि... महो. ५।६९
नाहं नान्यो न चैवैको न चानेको-
द्वयोऽद्वयः त्रि. पू. २।२१६
नाहं नेदमिति ध्यायंस्तिष्ठ त्व-
मचलाचलः महो. ६।३६
नाहं पदार्थस्य न मे पदार्थ इतिभाविते।
नान्तः शीतलया बुद्ध्या कुर्वतो
लीलया क्रियाम् । यो नूनं वास-
नात्यागो ध्येयो ब्रह्मन्प्रकीर्तितः महो. ६।४२
नाहं प्रकाशः सर्वस्य भ. गी. ७।२५
नाहं प्राणः क्षुत्पिपासे कुतो मे सर्वसारो. १२
नाहं ब्रह्मेति जानाति तस्य
मुक्तिर्न जायते पैङ्गलो. ४।२३
नाहं ब्रह्मेति सङ्कल्पात्सुदृढाद्बध्यते
मनः । सर्वं ब्रह्मेति सङ्कल्पात्
सुदृढान्मुच्यते मनः महो. ४।१२४

नाहं भवाम्यहं देवो नेन्द्रियाणि
दशैव तु । न बुद्धिर्न मनः
शश्वन्नाहङ्कारस्तथैव च सर्वसारो. ७
नाहं मन्ये सुवेदेति नो न वेदेति
वेद च । यो नस्तद्वेद तद्वेद.. केनो. २।२
नाहं मांसं न चास्थीनि देहादन्यः
परोऽस्म्यहम् । इति निश्चित-
वानन्तः क्षीणाविद्यो विमुच्यते महो. ४।१२७
नाहं विप्रो न च नरपतिर्नापि वैश्यो
न शूद्रो...किन्तु...लक्ष्मीभर्तुः
पद्कमलयोर्दासदासानुदासः भवसं. २।३४
नाहं वेदैर्न तपसा भ. गी.११।५३
नाहं वेद्यं व्योमवातादिरूपं सर्वसारो. ११
नाहं सन्नाप्यसन्मयः त्रि. पू. ५।९१
निकषे हेमरेखाभा यस्य रेखा
प्रदृश्यते । तदक्षमुत्तमं विद्यात् रु.जा.उ. १४
निक्षिप्ते कतके विहाय कलुषं यद्वज्जलं
निर्मलं...तद्वत्सर्वमिदं विहाय
सकलं...तत्त्वं तत्सहजस्वभाव-
ममलं तेजोऽमनस्के ध्रुवम् अमन.२।७६
निखानयन्ति शंकुभिः (यदिदं) आर्षे. १।२
निखिलनिगमोदितसकामकर्म-
व्यवहारो लोकः महावा. २
(ॐ) निगमं शङ्करोऽब्रवीत् सि. वि. ६
निगमो जायते पुरुषोत्तमात् सि. वि. २
निगमोवसुदेवोयो वेदार्थः कृष्णरामयोः कृष्णो. ६
निगिरेबेन्द्रङ्गसूतुर्मेरुं चलवद्स्त्विदम् ते.बिं. ६।८६
निगृहीतस्य मनसो निर्विकल्पस्य
धीमतः ।.. सुषुप्तेऽन्यो न तत्समः अद्वैतो. ३४
निगृहीतानि सर्वशः भ.गी.२।६८
निगृह्णाम्युत्सृजामि च भ. गी. ९।१९
निग्रहः किं करिष्यति भ. गी. ३।३३
नि च देवीं मातरं श्रियं वासय मे कुले
[ऋ. खि. ५।८७।१२+ श्रीसू. १२
निचाय्येमाꣳ(एनां)शांतिमत्यन्तमेति
[कठो. १।१७+ श्वेता. ४।११
नित्यचिन्मात्ररूपोऽस्मि मैत्रे. ३।१६
नित्यतृप्तोऽप्यभुञ्जानोऽप्यसमः
समदर्शनः । कुर्वन्नपि न कुर्वाणः.. २ आत्मो.१३

नित्यतृप्तो निराश्रयः — भ. गी. ४।२०
नित्यनिर्मलरूपात्मा ह्यात्मनोऽन्यन्न किञ्चन — ते. बिं. ६।४०
नित्यपरिपूर्णमखण्डानन्दामृतविशेषं शाश्वतं परमं पदं — त्रि.म. ना.७।७
नित्यप्रबुद्धचित्तस्त्वं कुर्वन्वाऽपि जगत्क्रियाम् । आत्मैकत्वंविदित्वा त्वं तिष्ठाक्षुब्धमहाब्धिवत् — महो. ४।११
नित्यबुद्धविशुद्धैकसच्चिदानन्दमस्म्यहम् — ते.बिं. ३।११
नित्यमगन्धवच्च यत् । अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते — कठो. ३।१५
नित्यमङ्गलमन्दिरम् [त्रि.म.ना.७।८× — सि. सा. ६।१
नित्यमन्तर्मुखः स्वच्छः स्वात्मनाऽन्तःप्रपूर्णधीः ।...कुरु कर्माणि वै द्विज — अ. पू.५।११५
नित्यमुक्तस्वरूपं कैवल्यानन्दरूपं — सि. सा. ६।१
नित्यमुक्तस्वरूपमनाधारमादिमध्यांतशून्यं — त्रि. म.ना.७।७
नित्यमेकाग्रभक्तिः स्याद्गोपीचन्दनधारणात् — वासुदे. १३
नित्ययुक्तस्य योगिनः — भ. गी. ८।१४
नित्ययुक्ता उपासते [भ. गी. ९।१४ +१२।२
नित्यलीलाभजनानन्दोऽयं रसोऽनिर्वचनीयः — रामर. ४९
नित्यविहितकर्मफलत्यागःप्रत्याहारः — शांडि. १।८।१
नित्यशुद्धचिदानन्दसत्तामात्रोहमव्ययः — ते. बिं. ३।११
नित्यशुद्धबुद्धपरब्रह्मानन्दमयोभवति — ना.पू.ता.२।४
नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दान्ताद्वयपरिपूर्णः परमात्मा ब्रह्मैवाहं रामोऽस्मि — म. वा. र. ९
नित्यशुद्धविमुक्तैकमखण्डानन्दमद्वयम् । सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमद्वयम् — वराहो. ३।२
(तदनु) नित्यशुद्धः परमात्माऽहमेव — मं. ब्रा. ३।२
नित्यशुद्धाय बुद्धाय नित्यायाद्वैतरूपिणे । आनन्दायात्मरूपाय नारायण नमोऽस्तु ते — ना. उ.ता. २।२
नित्यशेषस्वरूपोऽस्मि सर्वातीतोऽस्म्यहं सदा — ते.बिं. ३।१२
नित्यसृष्टिहेतुभूता च का — राधिको. १
नित्यस्योक्ताः शरीरिणः — भ. गी. २।१८
नित्यसाकारस्त्वाद्यन्तशून्यः शाश्वतः (नारायणः) — त्रि.म.ना.२।१
नित्यं च समचित्तत्वं — भ. गी.१३।१०
नित्यं त्रिषवणस्नायी पयोमूलफलादिभुक् ।... ततः सिद्धमनुर्भूत्वा जीवन्मुक्तो भवेन्मुनिः — रामर. ४।१-९
नित्यं दर्शनकांक्षिणः — भ.गी.११।५२
नित्यं यज्ञे प्रतिष्ठितम् — भ.गी. ३।१५
नित्यं वा मन्यसे मृतम् — भ.गी. २।२६
नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं तद्भूतयोनिं परिपश्यंति धीराः — मुण्डको.१।१।६
नित्यं विभुं सर्वगतं सुसूक्ष्मं च तदव्ययं [पा. ब्र. ३४+महो.४।८६+ — रुद्रह. ३२
नित्यं विभुं सर्वगतं सुसूक्ष्मं च तदव्ययम् । तद्भूतयोनिं पश्यन्ति धीरा आत्मानमात्मनि — रुद्रह. ३२
(ॐ) नित्यं शुद्धं बुद्धं निर्विकल्पं निराख्यातमनादिनिधनमेकं... सर्वदाऽनवच्छिन्नं परं ब्रह्म — यो. चू. ७२
नित्यं शुद्धं बुद्धं मुक्तं.. — म. वा.र. १४
नित्यं शुद्धं बुद्धं मुक्तं सत्यं सूक्ष्मं परिपूर्णमद्वयं...ब्रह्मैव — नृसिंहो. ९।८
नित्यं स गच्छेत्पदमनामकम् — २प्रणवो. १३
नित्यं सर्वगतं विद्धि शब्दब्रह्म सनातनम् — गान्धर्वो. ४
नित्यं सर्वसन्देहनाशनम् — निर्वाणो. ८
नित्यः शुद्धः सदाशिवः । सर्वासर्वविहीनोऽस्मि — मैत्रे. ३।६
(किन्तु) नित्यः शुद्धो निरञ्जनो विभुरद्वयः शिव एकः... — त्रि. ब्रा. १
नित्यः शुद्धो निरंजनो विभुरद्वयः शिव एकः — त्रि. ब्रा. १।?
नित्यः शुद्धो बुद्धमुक्तस्वभावः... आनन्दाब्धिर्यः परः सोहऽमस्मि — मैत्रे. १।१६
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः [भवसं. २।३९+ — भ. गी. २।२४

नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः। एकः सम्भिद्यते भ्रान्त्या मायया न स्वरूपतः [जा.द.१०।२+ अ.पू. ५।७५
नित्यानन्दमयंब्रह्म केवलंसर्वदास्वयम् [ते.बिं. ६।७२+ ६।१०२
नित्यानन्दमयोऽप्यात्मा ना. प.८।१६
नित्यानन्दस्वरूपोऽहम् ते.बिं.३।२७
नित्यानन्दं परमसुखदं केवलं ज्ञान-मूर्तिं...भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि शु. र. २।१९
नित्यानन्दं सदेकरसं (आत्मानं) नृसिंहो.१।१
नित्यानन्दः प्रसन्नात्मा ह्यन्यचिन्ता-विवर्जितः ..स जीवन्मुक्त उच्यते म.वा.र. ८
नित्यानन्दो निर्विकल्पो निराख्यः। अचिन्त्यशक्तिर्भगवान् गिरीशः शरभो. २१
[मोक्ष इति च] नित्यानित्यवस्तु-विचारादनित्य-संसार-सुख-दुःखविषयसमस्त-क्षेत्र-ममता-बन्धक्षयो मोक्षः निरा. उ. २२
नित्यानित्यविवेकश्चइहामुत्रविरागता वराहो. २।३
नित्यानित्यत्वे परस्परविरुद्धधर्मौ, तयोरेकस्मिन्ब्रह्मण्यत्यन्त-विरुद्धं भवति त्रि.म.ना. २।१
नित्यानित्यो व्यक्ताव्यक्तो ब्रह्माब्रह्माहम् अ. शिरः. १
नित्यानुभवरूपस्यकोमैत्रानुभवःपृथक् अवधू. २१
(अथ) नित्योऽक्षरःपरमः स्वराट् त्रि. म. ना.२।८
नित्योदितं विमलमाद्यमनन्तरूपं ब्रह्मास्मि अ. पू. १।१९
नित्योदितो निराभासो द्रष्टा साक्षी चिदात्मकः महो. ६।८०
(अथ) नित्यो देव एको नारायणः नारा. २
नित्यो नित्यानां चेतनश्चेतनानां... तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् कठो. ५।१३
नित्यो नित्यानां चेतनश्चेतनानां... तत्कारणं साङ्ख्ययोगाधिगम्यं [श्वेता. ६।१३+ भवसं. २।४८
नित्यो नित्यानां चेतनश्चेतनानां... तं पीठगं येऽनुभजन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् गो. पू. ३।३
नित्या नित्यानां चेतना चेतना-नामेका बहूनां विदधाति कामान् गुह्यका. ७१
नित्योऽयं धर्मो ब्राह्मणानां ब्रह्मचारि-गृहिवानप्रस्थयतीनाम् भस्मजा. १।६
नित्यो निष्कलङ्को निर्विकल्पो निरञ्जनोनिराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् त्रि.म.ना.१।९
नित्योऽस्मि विमलोऽस्म्यहम् मैत्रे. ३।२
नित्योऽहं निरवद्योऽहं निष्क्रियो-ऽस्मि निरञ्जनः।...निर्मलो निर्विकल्पोऽहं.. ब्र.वि. ९७
नित्योऽहं शाश्वतो ह्यजः ते.बिं. ३।४८
निदाघ शृणु सत्त्वस्था जाता भुवि महागुणाः । ते नित्यमेवाभ्युदिता मुदिता ख इवेन्दवः महो. ४।२७
निदाघो नाम मुनिराट् प्राप्तविद्यश्च बालकः। विहृतस्तीर्थयात्रार्थं पित्रानुज्ञातवान्स्वयम् महो. ३।१
निदाघो नाम मुनिः पप्रच्छ ऋभुं भगवन्तमात्मानात्मविवेकमनु-ब्रूहीति ते.बिं. ५।१
निदिध्यासनमित्येतत् पूर्णबोधस्य कारणम् (श्रवणं तु गुरोः पूर्वं मननं तदनन्तरम्) शु. र. ३।१३
निदिध्यासनं दध्यात् कुंडिको. ९
निद्राघरूपनाशस्तु वर्तते देहमुक्तिके म.वा.र.१०
निद्रादौ जागरस्यान्ते...लक्षणं मुक्तचेतसः अमन.२।६४
निद्रालस्यप्रमादोत्थं भ.गी.१८।३९
निद्राभयसरीसृपं हिंसादितरङ्गं तृष्णावर्तं दारपङ्कं संसारवार्धिं तर्तुं...तारकमवलोकयेत् मं.ब्रा. १।२

निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च । द्रष्टारश्चेत्कल्पयन्तु किं मे स्यादन्यकल्पनात् अवधू. १४
निद्राया लोकवार्तायाः शब्दादेरात्मविस्मृतेः । क्वचिन्नावसरं दत्त्वा चिन्तयात्मानमात्मनि अध्यात्मो. ५
निद्रालस्ये मोहरागौ...गुणास्तामसस्य शारीरको. ८
निद्रेवान्तर्हितेन्द्रियः शुद्धितमया धिया स्वप्नइवयःपश्यतीन्द्रियबिलेऽविवशः प्रणवाख्यं.. सोऽपि प्रणवाख्यः.. मैत्रा. ६।२५
निधनमिति त्र्यक्षरं तत्सममेव भवति छांदो. २।१०।४
निधानं बीजमव्ययम् भ.गी.९।१८
निधाय भारं पुनरस्तमेति चित्यु. १४।१
निधिदाताऽन्नदो मत इति द्वितीयःपादः ग. पू. १।१३
निन्दन्तस्तव सामर्थ्यं भ. गी.२।३६
(एवं) निन्दागर्व-मत्सर-दम्भ-दर्पेच्छा-द्वेष-सुख-दुःख-काम-क्रोध-लोभ-मोहहर्षासूयाहंकारादींश्च हित्वा स्ववपुः कुणपमिव दृश्यते प. हं. ३
निन्दाद्यो ब्रह्मान्दिष्वाच सर्वास्तान्भष्मषा (भस्मसात्) कुरु सहवै. ८
निन्दास्तुतिव्यतिरिक्तो न मन्त्रतन्त्रोपासको देवान्तरध्यानशून्यः... ब्रह्मप्रणवानुसन्धानेन यःकृतकृत्यो भवति स परमहंसपरिव्राट् प. हं. प.११
निन्दाहङ्कारमत्सरगर्वदम्भेर्ष्यासूयेच्छाद्वेषसुखदुःखकामक्रोधलोभमोहादीन् विसृज्य... जातरूपधरश्चरेदात्मानम् ना.प.३।८७
निन्दितो न शपेत्परान् [कठरु.७+ कुंडिको. १२
निपातेषु चैनं वैय्याकरणा उक्षजं समामनन्ति २प्रणवो. १४
निपीडय सीविनीं सूक्ष्मं दक्षिणेतरगुल्फतः । वामं याम्येन गुल्फेन मुक्तासनमिदं स्मृतम् जा. द. ३।८
निबद्धः स्वेन कर्मणा भ.गी.१८।६०
निबध्नन्ति धनञ्जय [भ.गी.४।४१ +९।९
निबध्नन्ति महाबाहो भ. गी. १४।५
निबन्धायासुरी मता भ.गी.१६।५
निबोधस्त्वात्मबोधोऽयंसद्यःप्रत्ययकारकः अमन.२।२५
निभगाऽहं त्वयि मृजे स्वाहा तैत्ति. १।४।३
निमज्जनं पृथिव्याः स्थानादपसरणं सुराणां [मैत्रा.१।८+ मैत्रे. १।३
निमित्तमात्रं भव सव्यसाचिन् भ.गी.११।३३
निमित्तस्त्वातुरः, अनिमित्तः क्रमसन्न्यासः ना. प. ५।३
निमित्तस्यानिमितत्त्वमिष्यते भूतदर्शनात् अ. शां. २५
निमित्तं किंचिदाश्रित्य खलु शब्दः प्रवर्तते । यतो वाचो निर्वर्तन्ते कठरु. ३४
निमित्तं हि सदा चित्तं संस्पृशत्यध्वसु त्रिषु । अनिमित्तो विपर्यासः कथं तस्य भविष्यति अ. शां. २७
निमित्तानि च पश्यामि भ.गी.१।३०
निमिषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना (ब्रह्मनिष्ठाः) ते. बिं. १।४७
निमिषोच्छ्वासपलकैर्नाडिभिः प्रहरैर्दिनैः अमन. १।३२
निमीलनादि कूर्मकर्म (कूर्मवायोः) शांडि. १।४।९
निमीलनादिकूर्मस्य क्षुधा तु कृकरस्य च जा. द.४।३४
निमीलितदर्शनममादृष्टिः मं. ब्रा. २।२
निमीलिताक्षस्य पुरत्रयाणि सि. शि. १६
निमेषकाले तस्याः प्रलयो भवति त्रि.म.ना. ४।६
निम्नाभिं कम्बुकण्ठं (गणेशं) ग. पू. २।७
निम्लोचन्ति ह्यन्या देवताः, न वायुः.. बृह. १।५।२२
नियतस्य तु सन्न्यासः भ. गी. १८।७
नियतं कुरु कर्म त्वं भ. गी. ३।८
नियतं क्रियतेऽर्जुन भ. गी. १८।९
नियतं सङ्गरहितं भ.गी. १८।२३
नियतिसहिताः शृङ्गारादयो नव रसा अणिमादयः भावनो. ३
निर्यातं न विमुञ्चन्ति महान्तो भास्करा इव। (अदि्धवद्भूतमर्यादा भवंति विशदाशयाः)महो.४।२०+ ना.प. ५।२२
नियन्तेश्वरः सर्वाहम्मानी नृसिंहो. ९।४
नियम्य भरतर्षभ भ. गी. ३।४१

नियम्यारभतेऽर्जुन भ. गी. ३।७
नियामनसमर्थोऽयं निनादो निशिताङ्कुशः । नादोऽन्तर-ङ्गसारङ्गबन्धने वागुरायते ना. विं. ४५
नियमः स्वान्तरिन्द्रियनिग्रहः निर्वाणो. ५
नियमानन्दविशेषगण्यं मुनिजनैरुप-सङ्कीर्णं नैमिषारण्यं... ना. प. १।१
नियमेष्वप्रमत्तस्तु यमेषु च सदा भवेत् ना. प. ६।३२
नियुक्तस्तु यतिः श्राद्धं दैवे वा मांस-मुत्सृजेत् । यावन्ति पशुरोमाणि तावन्नरकमृच्छति इतिहा. २८
नियोजयसि केशव भ. गी. ३।१
निरञ्जनमनन्तब्रह्मानन्दसमष्टिकन्दं.. स्वयम्प्रकाशमनिशं ज्वलति त्रि.म.ना. ७।७
निरञ्जनमनामयं हुम्फट्कुर्वाणं... शिवं प्रणम्य... कृताञ्जलिपुटः पप्रच्छ भस्मजा. १।१
निरञ्जनं निराकारं निराश्रयं निरति-शयाद्वैतपरमानन्दलक्षणमादि-नारायणं ध्यायेत् त्रि.म.ना.७।१२
निरञ्जनं निष्क्रियं सन्मात्रं चिदा-नन्दैकरसं शिवं प्रशान्तममृतं तत्परं च ब्रह्म शाण्डि.२।१।३
निरञ्जनं परब्रह्मस्वरूपं परब्रह्मणः परमरहस्यकैवल्यं...विजयते त्रि.म.ना.७।९
निरञ्जनः परमं साम्यमुपैति मुण्ड. ३।१।३
निरञ्जने विलीयेते मनोवायू ना. विं. ५०
निरञ्जनो निराख्यातो निर्विकल्पो.. सि. वि. १
(ॐ) निरञ्जनो निराख्येयो निर्विकल्पो निरामयः (पाठः) सि. वि. १
निरञ्जनो निर्विकारो निरभिमानः (आत्मा) १ आत्मो. १
निरञ्जनो निर्विकारः...सोऽचिन्त्यो निर्वर्ण्यश्च पुनात्यशुद्धान्यपूतानि १आत्मो. १
निरतिशयदिव्यतेजोमण्डलं...निरति-शयपरमानन्दपारावारमनन्तै-रानन्दपुरुषैश्चिद्रूपैरधिष्ठितम् त्रि.म.ना. ७।२
निरतिशयदिव्यतेजोराशिः त्रि.म.ना.७।४
निरतिशयदिव्यतेजोराश्यन्तर-समासीनमादिनारायणं ध्यात्वा ...विद्याविद्ययोः सन्धौ वैकुण्ठ-पुरमाभाति त्रि.म.ना. ६।६
निरतिशय-निरङ्कुश-सर्वज्ञ-सर्वशक्ति... कल्याणगुणाकारो भवति त्रि.म.ना. २।६
निरतिशयपरमानन्दपरममूर्तिविशेष-मण्डलं...द्वात्रिंशद्व्यूहभेदैरधिष्ठितम् त्रि.म.ना. ७।८
निरतिशयपरमानन्दलक्षणपरब्रह्मणः परममूर्तिपरमतत्त्वविलासविशेष-मण्डलं...द्वात्रिंशद्व्यूहभेदैरधिष्ठितम् त्रि.म.ना. ७।८
निरतिशयब्रह्मगन्धस्वरूपं...आदि-नारायणं ध्यायेत् त्रि.म.ना.७।१२
निरतिशयब्रह्मानन्दपरममूर्तिमहायन्त्रं ...चित्स्वरूपं...विजयते त्रि.म.ना.७।९
निरतिशयलक्षणमहाविष्णुस्वरूपं... विष्वक्सेनं ध्यात्वा...ब्रह्मतेजो-मयानवलोक्योपासकः परमा-नन्दं प्राप त्रि.म.ना. ६।६
निरतिशयानन्दचामरविशेषैः परि-सेवितं... निरतिशयाद्वैतपरमा-नन्दलक्षणमादिनारायणं ध्यायेत् त्रि.म.ना.७।१२
निरतिशयाद्वैतपरमानन्दलक्षणोभूत्वा त्रि.म.ना. ८।३
निरतिशयानन्दतेजोमण्डलमद्वैत-परमानन्दलक्षणपरब्रह्मणः... द्वात्रिंशद्व्यूहभेदैरधिष्ठितम् त्रि.म.ना. ७।८
निरतिशयानन्दतेजोराशिविशेषं(ब्रह्म) त्रि.म.ना. ४।१
निरतिशयानन्ददिव्यतेजोराशिः त्रि.म.ना.६।६
निरतिशयानन्द-परममङ्गलविशेष-समष्ट्याकारं...द्वात्रिंशद्व्यूहभेदै-रधिष्ठितम् त्रि.म.ना. ७।८
निरतिशयानन्दपारावारो भूत्वा... महामायां नमस्कृत्य...महाविराट्-पदं प्राप त्रि.म.ना. ६।३
निरतिशयानन्दमयानन्तपरमविभूति-समष्टा विश्वाकारः त्रि.म.ना. २।६
निरतिशयानन्दलक्षणं प्रणवाख्यं विमानं विराजते त्रि.म.ना. ७।९

निरतिशयानन्दसहस्रप्राकारैरलङ्कृतं... शश्वदमितपुष्पवृष्टिभिः समन्ततः सन्ततम् । तदेव त्रिपाद्विभूतिवैकुण्ठस्थानं परमकैवल्यम् त्रि.म.ना. ७।८
निरतिशयानन्दं प्राप्य...बोधानन्दविमानपरम्परासूपासकः परमानन्दं प्राप त्रि. म.ना.६।७
निरतिशयानन्दाद्वितीयोऽहमेव त्रि.म.ना. ८।६
निरतिशयानन्दानन्ततटित्पर्वताकारमद्वितीयं स्वयम्प्रकाशमनिशं ज्वलति त्रि.म.ना. ७।७
निरतिशयानन्दैरनन्तवृन्दावनैरतिशोभितमखिलपवित्राणां परमपवित्रं...तुलसीवैकुण्ठं प्रविश्य... निरतिशयसौन्दर्यलावण्याधिदेवतां...श्रीसखीमेवं तुलसीं ध्यात्वा...गत्वा गत्वा ब्रह्मवनेषु... तत्रानन्दतरङ्गिण्याः प्रवाहेषु स्नात्वा बोधानन्दवनं प्राप्य... तन्मध्ये च शुद्धबोधानन्दवैकुण्ठं यदेव ब्रह्मविद्यापादवैकुण्ठम् त्रि.म.ना. ६।८
निरन्तरनिरुपमनिरतिशयोत्कटज्ञानानन्दानन्तगुच्छफलैरलङ्कृतं ...आदिनारायणं ध्यायेत् त्रि.म.ना.७।१२
निरन्तरसमाधिपरम्पराभिर्जगदीश्वराकाराः सर्वत्र सर्वावस्थासु विभान्ति त्रि.म.ना.५।५
निरन्तरं नारायणो वैकुण्ठे रमया रहस्यलीलां सञ्चायमानोऽभवत् सामर. ३
निरन्तराभिनवं...शाश्वतं परमं पदं... स्वयम्प्रकाशमनिशं ज्वलति त्रि.म.ना.७।७
निरवद्यं निरञ्जनम् । अमृतस्यपरंसेतुं श्वेताश्व.६।१९
निरवद्यं निरञ्जनं निराकारं निराश्रयं...आदिनारायणं ध्यायेत् त्रि.म.ना.७।१२
निरवधिनाराचविकिरपातो निदाघविनोदनधारागृहशीकरवर्षणमिव... भवितव्यमेवं दृढवैराग्याद्बोधो भवति महो. ४।२६
निरवधिनिजबोधोऽहं शुभतरभावोऽहमप्रभेद्योऽहम् आ. प्र. ७

निरवयवं निराधारं निर्विकारं... निर्मलं निरवद्यं...कूटस्थमचलं... देशतः कालतो वस्तुतः परिच्छेदरहितं...शाश्वतं परमं पदं... ज्वलति त्रि.म.ना.७।७
'निरवयवं ब्रह्मचैतन्यं' इति सर्वोपनिषत्सु सर्वशास्त्रसिद्धान्तेषु श्रूयते त्रि.म.ना.२।१
निरवयवात्मा केवलः सूक्ष्मो निर्ममो निरञ्जनो निर्विकारः...पुनात्यशुद्धान्यपूतानि १आत्मो. ६
निरस्तकल्पनाजालमचित्तत्वं परं पदम् महो. ५।६०
निरस्तविषयासङ्गं सन्निरुद्धं मनो हृदि । यदा यात्युन्मनीभावं तदा तत्परमं पदम् ब्र. बिं. ४
निरस्तविषयासङ्गंसन्निरुध्यमनोहृदि।यदा यात्यमनीभावस्तदा तत्परमं पदम् त्रि. ता. ५।४
निरस्तातिशयाह्लादसुखभावैकलक्षणा। भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता भवसं. १।३१
निरस्ताविद्यातमोमोहो (अहं) एवेति [ग. शो. ३।४+ रामो. २।४
निरंशोऽस्मि चिदाकाशमिति मत्वा न शोचति अ. पू. ५।९२
निरंशोऽस्मि निराभासो न मनोऽनेन्द्रियोऽस्म्यहम् ते.बिं. ३।४४
निराकारं निराभासं २ तत्त्वो. २
निराकारं निराश्रयं निरतिशयाद्वैत... आदिनारायणं ध्यायेत् त्रि.म.ना.७।१२
निराकारा निष्परिग्रहा अशिखा अयज्ञोपवीता अन्धा बधिरा मुग्धाः क्लीबा मूका उन्मत्ता इव परिवर्तमानाः...प्रणवमेव परं ब्रह्मात्मप्रकाशं शून्यं जानन्तस्तत्रैव परिसमाप्ताः नृसिंहो. ६।३
निराकारोऽस्म्यहं सदा । केवलं ब्रह्ममात्रोऽस्मि ते.बिं. ३।२१
निरात्मकत्वादसङ्कयोऽयोनिश्चिन्त्यः मैत्रा. ६।२०
निरात्मकत्वान्न सुखदुःखभाग्भवति मैत्रा. ६।२१

निरात्मकमात्मैवेदं सर्वं तस्मात्सर्वात्मकेनाकारेण सर्वात्मकमात्मानमन्विच्छेत् — नृसिंहो.७।२

निराधारं निर्विकारं निरञ्जनमनन्तं ब्रह्मानन्दसमष्टिकन्दं.. — सि.सा. १।१

निरानन्दोऽपि सानन्दः सदासद्बभूव सः — अ. पू. ३।१८

निरामयं शान्तमुमासहायं — १बिल्वो. ११

निरालम्बस्तु (योगः) समस्तनामरूपकर्मातिदूरतया...भावनं निरालम्बयोगः... — त्रि.म.ना.८।४

निरालम्बपीठः (पीठम्) — निर्वाणो. १४

निरालम्बं पदं प्राप्तं — २ तत्त्वो. ७

निरालम्बं समाश्रित्य सालम्बं विजहाति यः । स सन्न्यासी च योगी च कैवल्यं पदमश्नुते — निरालं. २

निराशता निर्भयता नित्यता समता ज्ञता ।...हेयोपादेयनिर्मुक्ते ज्ञे तिष्ठन्त्यपवासनम् — महो.६।२९,३०

निराशीरपरिग्रहः — भ. गी.५।१०

निराशीर्निर्ममो भूत्वा — भ.गी.३।३०

निराशीर्यतचित्तात्मा — भ.गी.४।११

निराश्रयमतिनिर्मलानन्तकोटिरविप्रकाशैकोज्ज्वलं..कैवल्यानन्दरूपं..शाश्वतं शश्वद्विभाति — सि.सा. ६।१

निराहारस्य देहिनः — भ. गी. २।५

निरिच्छत्वादकर्ताऽसौ कर्ता सन्निधिमात्रतः (आत्मा) — महो.४।१४

निरिच्छं प्रतिबिम्बन्ति जगन्ति मुकुरे यथा — महो. ५।९५

निरिच्छे संस्थिते रत्ने यथा लोकः प्रवर्तते । सत्तामात्रे परे तत्त्वे तथैवायं जगद्गणः — महो. ४।१३

निरिच्छोः परिपूर्णस्य नेच्छा सम्भवति कचित् — अ. पू. ६।७

निरिन्द्रियो नियन्ताऽहं — म. वा. र.९

निरिन्धनज्योतिरिवोपशान्तो न चोद्विजेदुद्विजेद्यत्रकुत्र... — म.वा.र. ९

निरीश्वरोऽहं निरहं च निर्ममः — कुण्डिको. १७

निरीहोऽस्मि निरामयः । सदाऽसङ्गस्वरूपोऽस्मि — ते. बिं.३।६

निरुक्तस्त्रयोदशस्तोभः सञ्चरो हुङ्कारः — छांदो.१।१३।३

निरुक्तं चानिरुक्तं च.. यदिदं किञ्च । तत्सत्यमित्याचक्षते — तैत्ति. २।६

निरुक्तः सोमस्य मृदुश्लक्ष्णवायोः श्लक्ष्णं बलवदिन्द्रस्य...तान्सर्वानेवोपसेवेत वारुणं त्वेव वर्जयेत् — छां.उ.२।२२।१

निरुद्धं योगसेवया — भ. गी.६।२०

निरुध्य मारुतं गाढं शक्तिचालनयुक्तितः । अष्टधा कुण्डलीभूतामृज्वीं कुर्यात्तु कुण्डलीम् — यो.शि. १।८२

निरुध्य वायुना दीप्तो वह्निरूहति कुण्डलीम् । पुनः सुषुम्नया वायुर्वह्निना सह गच्छति — जा.द.६।४२

निरुपमनिरवद्यनित्यशुद्धबुद्ध..विमानजालावलिभिः समाकुलम् — सि. सा. ६

निरुपाधिकनित्यं यत्सुप्तौ सर्वसुखात्मकम् । सुखरूपत्वमस्त्येतत्.. — वराहो. ३।१०

निरुपाधिकसाकारस्त्रिविधः ब्रह्मविद्यासाकारश्चानन्दसाकार उभयात्मकसाकार इति — त्रि.म.ना.२।१

(तस्मादेव) निरुपाधिकसाकारस्य निरवयवत्वात्स्वाधिकमपि दूरतो निरस्तम् — त्रि.म.ना.२।१

निरुपाधिकी संविदेव कामेश्वरः — भावनो. ९

निर्गतगुणत्रयम् — निर्वाणो. ३

निर्गता विगताऽभीष्टा हेयोपादेयवर्जिता । ब्रह्मन्समाधिशब्देन परिपूर्णमनोगतिः — म.वा.र. १०

निर्गुणध्यानयुक्तस्य समाधिश्च ततो भवेत् — १यो. त. १०९

निर्गुणं गुणभोक्तृ च — भ.गी.१३।१५

निर्गुणं निष्क्रियं सूक्ष्मं..एकमेवाद्वितीयं ब्रह्म — अध्यात्मो.६२

निर्गुणं निष्क्रियं निर्मलं निरवद्यं..निराकारं..आदिनारायणं ध्यायेत् — त्रि.म.ना.७।१२

निर्गुणः केवलात्माऽस्मि — ते. बिं. ३।२१

निर्गुणः केवलोऽस्म्यहम् — मैत्रे. ३।२२

निर्गुणः साक्षीभूतः शुद्धः (आत्मा) २आत्मो. ६
निर्गुणः..निष्क्रियो निरवयव आत्मा म. वा. र.१५
निर्गुणोऽस्मि शिवोऽस्म्यहम् मैत्रे. ३।४
निर्गुणोऽस्मि समोऽस्म्यहम् मैत्रे. ३।४
निर्गुणोऽहं परात्परः ते. बिं. ४।१
निर्ग्रन्थिः शान्तसन्देहो जीवन्मुक्तो.. अनिर्वाणोऽपि निर्वाणश्चित्रदीप इव स्थितः अक्ष्युप. ४२
निर्जीवः काष्ठवत्तिष्ठेत् अमन.१।२५
निर्णिज्य कंसं चमसं वा पश्चादग्नेः.. संविशति चर्मणि वा स्थण्डिले वा छान्दो.५।२।८
निर्दग्धवासनाबीजः.. सदेहो वा विदेहो वा न भूयो दुःखभाग्भवेत् अ. पू. ५।१८
निर्दोषं हि समं ब्रह्म भ.गी.५।१४
निर्द्वन्द्वः सदाऽचलगात्रः..नित्यशुद्धः परमात्माऽहमेवेत्यखण्डानन्दः पूर्णः.. ब्रह्माहमिति कृतकृत्यो भवति म.वा.र. ८
निर्द्वन्द्वो नित्यसत्त्वस्थः भ.गी.२।४५
निर्द्वन्द्वो नित्यसत्त्वस्थः सर्वत्र समदर्शनः ना. प. ४।१३
निर्द्वन्द्वो निरहङ्कारो निराशीरपरिग्रहः ते. बिं. १।३
निर्द्वन्द्वो हि महाबाहो भ.गी. ५।३
निर्धनोऽपि सदा तुष्टोऽप्यसहायो महाबलः २ आत्मो. १२
निर्धूताशेषपापौघो मत्सायुज्यं भजत्ययम् मुक्तिको.१।२१
निर्बीजं त्रैपदं तत्त्वं तदस्मीति विचिन्तये सुबा.शीर्षकं. १
निर्बीजा वासना यत्र तत्तुर्यं सिद्धिदं स्मृतम् अ.पू. ५।१६
निर्भावंनिरहङ्कारंनिर्मनस्कमनीहितम् १सं.सो.२।३७
निर्भुजवक्ता इति ह स्माह ह्रस्वो माण्डूकेयः ३ ऐत. १।५।२
निर्ममः शुक्लध्यानपरायणोऽध्यात्मनिष्ठः.. ब्रह्माहमस्मीति ब्रह्मप्रणवमनुस्मरन्.. सन्न्यासेनैव देहत्यागं करोति स कृतकृत्यः.. ना. प. ३।८७
निर्ममेति विमुच्यते [पैङ्गलो.४।२०+ महो. ४।८२
निर्ममो निरञ्जनो निर्विकारः... सोऽचिन्त्यो निर्वर्ण्यश्च पुनात्यशुद्धानि..एष परमात्मा नाम १ आत्मो. ३
निर्ममोनिरहङ्कारः[ना.प.६।२५+भ.गी.२।७१+१२।१३
निर्ममो निरहङ्कारो निरपेक्षः ना. प. ३।७६
निर्ममोऽध्यात्मनिष्ठः..ज्ञानवैराग्ययुक्तो.. भैक्षमाणो ब्रह्मभूयाय कल्पते प. हं. प. ६
निर्मलगात्रम्, निरालम्बपीठम् निर्वाणो. ४
निर्मलनिर्वाणमूर्तिरेवाहम् आ. प्र. ७
निर्मलसहजस्थितपुरुषे न दिवारात्रिभेदोऽप्यस्ति अमन.२।१०९
निर्मलं निर्मनस्कं च निराभासं सदा त्यज अमन.२।२६
निर्मलायां निराशायां स्वसंवित्तौ स्थितोऽस्म्यहम् १सं.सो.२।५१
निर्मानमोहा जितसङ्गदोषाः भ.गी.१११५५
निर्मानश्चानहङ्कारो.. नैव क्रुध्यति न द्वेष्टि नानृतं भाषते गिरा ना.प.५।२९
निर्मूलं कलनां त्यक्त्वा वासनां यः शमं गतः।ज्ञेयं त्यागमिमं विद्धि मुक्तं तं ब्राह्मणोत्तमम् महो. ६।४६
निर्मूलप्रविनष्टमारुततया निर्जीवकाष्ठोपमः..निर्वातस्थितदीपवत् सहजवान् पार्श्वस्थितैर्दृश्यते अमन.२।७५
निर्मोक्षायेह भूतानां लिङ्गग्रामो निरर्थकः ना. प. ४।३३
निर्यक्ष्मममचीचते कृत्यान्निर्ऋतिं च सहवै. ५
निर्योगक्षेम आत्मवान् भ. गी. २।४५
निर्लेपकं निरापायं कूटस्थमचलं ध्रुवम्। ज्योतिषामपि तज्ज्योतिस्तमःपारं प्रतिष्ठितम् यो. शि. ३।२१
निर्वचनमनौपम्यं निरुपाख्यं किं तदवाच्यम् मैत्रा. ६।७
निर्वाणो देवता, निष्कुलप्रवृत्तिः निर्वाणो. १
निर्वाणोपनिषद्वेदं..स्वमात्रं..चिन्तयेत् निर्वाणो. शीर्ष.
निर्वाणोस्मि निरीहोस्मि निरंशोस्मि १ सं.सो.२।५६
निर्वातस्थितदीपवत्र सहजाखण्डस्वभावं परं...तेजोऽमनस्कं ध्रुवम् अमन. २।७६
निर्वातस्थो यथा दीपो..जगद्व्यापारनिर्मुक्तस्तथा योगी लयङ्गतः अमन. १।२६

निर्वाणपदमाश्रित्ययोगी कैवल्यमश्नुते त्रि. ब्रा. १७३
निर्वाणवाञ्निर्मननः क्षीणचित्तः प्रशान्तधीः।..जाग्रत्येव सुषुप्तिस्थः कुरु कर्माणि वै द्विज अ.पू.५।११४
निर्विकल्पमनन्तं च... अप्रमेय- मनाद्यन्तं यज्ज्ञात्वा मुच्यते बुधः त्रि. ता. ५।९
निर्विकल्पमनन्तं च हेतुदृष्टान्त- वर्जितम्। ज्ञात्वा च.. शिवम्। न निरोधः.. इत्येषा परमार्थता ब्र. विं. ९
निर्विकल्पस्वरूपात्मा सविकल्प- विवर्जितः ते. विं. ४।७५
निर्विकल्पस्वरूपोऽस्मि ते. विं. ३।६
निर्विकल्पं निरञ्जनम्। एकमेवाद्वयं ब्रह्म नेह नानाऽस्ति किञ्चन अध्यात्मो. ६२
निर्विकल्पं निरञ्जनं निराख्यात- मनादिनिधनमेकं परं ब्रह्म यो. चू. ७२
निर्विकल्पं परं तत्त्वं सदा भूत्वा परं भवेत् सौभाग्य. १६
निर्विकल्पः प्रसन्नात्मा प्राणायामं समाचरेत् म. वा. इ. १
निर्विकल्पः समाधिः स्यान्निवात- स्थितदीपवत् सरस्व. ५३
निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते। सा सर्वदा भवेद्यस्य स जीवन्मुक्त इष्यते (उच्यते) अध्यात्मो. ४४
निर्विकल्पेन मनसा यश्चरेच्छक्तिदेहे स कालीरूपो भवेत् श्रीचक्रो. २
निर्विकल्पो निराकाङ्क्षः सर्वव्यापी सोऽचिन्त्यो निर्वेण्यश्च पुनात्य- शुद्धानि.. एष परमात्मा नाम १ आत्मो. ३
निर्विकल्पोऽस्मि नित्योऽस्मि निरा- लम्बोऽस्मि निर्द्वयः कुण्डिको. २५
निर्विकल्पो ह्ययं दृष्टः प्रपञ्चो- पशमोऽद्वयः वैतथ्य. ३६
निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः। वृत्तिविस्मरणं सम्यक् समाधिरभिधीयते ते. विं. १।३७
निर्विकारस्तथा शिवः त्रि. ब्रा. २।१३
निर्विकारं निराश्रयम्। ज्योतिषामपि तज्ज्योतिस्तमःपारे प्रतिष्ठितम् यो. शि. ३।२१
निर्विकारे निराकारे निर्विशेषे भिदा कुतः अध्यात्मो. २२
निर्विकारो निरामयः। सर्वनादान्त- रोऽसि त्वं.. ते. विं. ५।७१
निर्विकारोऽहमव्ययः ते. विं. ३।६
निर्विचारोऽस्मि सोऽस्म्यहम् मैत्रे. ३।१०
निर्विशेषब्रह्मतत्त्वं स्वमात्रमिति चिन्तये योगकुं. शीर्ष.
निर्विशेषं निरञ्जनम्। अलक्षणमलक्ष्यं तदप्रतर्क्यमनूपमम् यो. शि. ३।१६
निर्विशेषे परानन्दे कथं शब्दः प्रवर्तते।.. तद्ब्रह्मानन्दमद्वन्द्वं.. विदित्वा स्वात्मरूपेण न बिभेति कुतश्चन कठरु. ३५
निर्वैरः शान्तो दान्तः सर्वतोनिर्वेदमा- साद्य.. स-रि-ग-म-प-ध-नि-स- संज्ञैर्वैराग्यबोधकरैः स्वरविशेषैः.. मोहयन्नागतं.. नारदमवलोक्य.. शौनकादिमहर्षयः... उपवेशयित्वा स्वयं सर्वेऽप्युपविष्टाः ना. प. १।१
निर्वैरः शान्तो दान्तः सन्न्यासी... देहत्यागं करोति स मुक्तो भवति ना. प. १।१
निर्वैरः सर्वभूतेषु भ.गी. ११।५५
निलयनं चानिलयनं च तैत्ति. २।६
निवर्तते तदुभयं वशित्वं चोपजायते आयुर्वे. ११
निवर्तन्ते क्रियाः सर्वास्तस्मिन्दृष्टे परावरे ध्या. विं. १५
निवसिष्यसि मय्येव भ. गी. १२।८
निवातस्थितदीपवदचलसम्पूर्णभावा- भावविहीनकैवल्यज्योतिर्भवति मं. ब्रा. २।६
निवार्यमाणयत्नेनवद्धुं नावशक्यते अमन. २।७२
निवासः शरणं सुहृत् भ. गी. ९।१८
निवृत्तस्याप्रवृत्तस्यनिश्चलाहितदास्थितिः अ. शां. ८०
निवृत्तिर्विषयाणां च प्रत्याहारो न संशयः योगो.२४,३१
निवृत्तिः परमा तृप्तिरानन्दो- ऽनुपमः स्मृतः अध्यात्मो.२९

निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः । अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः — आगम. १०

निवृत्तोऽपि प्रपञ्चो मे सत्यवद्भाति सर्वदा । सर्पादौ रज्जुसत्तेव ब्रह्मसत्तैव केवलम् — आ. प्र. १३

निशीर्य शल्यानां मुखा शिवो नः शम्भुराभर — नीलरु. २।६

निशोषति निपतति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाऽथापः सृजते — छांदो. ७।११।१

निश्चयज्ञानमासनं (ब्रह्मीभूतस्य) — मं. ब्रा. २।५

निश्चयं च परित्यज्य अहं ब्रह्मेति निश्चयम् । आनन्दभरितस्वान्तो वैदेही मुक्त एव सः — ते. बिं. ४।३८

निश्चयं शृणु मे तत्र — भ. गी. १८।४

निश्चयेन सर्वाद्वैतं कर्तव्यम् — स्वसंवे. ४

निश्चलज्ञानमासनम् (आत्मनः) — आत्मपू. १

निश्चलत्वं प्रदक्षिणत्वम् [आत्मपू.१ +मं. ब्रा. २।५

निश्चलं निश्चरच्चित्तमेकीकुर्यात्... — अद्वैत. ४५

निश्चलं निर्विकल्पं च निराकारं निराश्रयम् — ते. बिं. १।६

निश्चलं (चित्तं) मोक्ष उच्यते — यो.शि. ६।५८

निश्चितं चात्मभूतानामरिष्टं योगसेवया — २ योगत. १५

निश्चितं मतमुत्तमम् — भ. गी. १८।६

निश्चितं युक्तियुक्तं च यत्तद्भवति नेतरत्.. मायया जायते तु सः — अद्वैत. २३

निश्चितायां यथा रज्ज्वां विकल्पो विनिवर्तते । रज्जुरेवेति चाद्वैतं तद्वदात्मविनिश्चयः — वैतथ्य. १८

निश्चिता विगताभीष्टा हेयोपादेयवर्जिता ।....परिपूर्णा मनोगतिः — अ. पू. १।५०

निश्चेष्टाः स्युः शाद्वलस्था हरिण्यो गानानन्दे लीयते विश्वमेतत् — गान्धर्वो. ९

निश्चेष्टो निर्गतारम्भो ह्यानन्दं याति तत्त्ववित् — अमन. २।२१

निश्चेष्टो निर्विकारश्च लयो जीवति योगिनाम् — वराहो. २।८१

निश्श्रेयसकरावुभौ — भ. गी. ५।२

निश्श्रेयसाययुञ्जीतजपध्यानपरायणः — त्रि.ब्रा.२।१२८

निश्वासभूता मे (रामस्य) विष्णोर्वेदा जाताः सुविस्तराः । तिलेषु तिलवद्वेदे वेदान्तः सुप्रतिष्ठितः — मुक्तिको. १।९

निश्वासोच्छ्वासकासाश्च प्राणकर्म.. — जा. द. ४।३१

निश्वासोच्छ्वासनं सर्वं मासानां संक्रमो भवेत् — जा. द. ४।४५

निश्शब्दं तत्परं ब्रह्म परमात्मा समीयते — ना. बिं. ४८

निश्शब्दं देशमास्थाय तत्रासनमवस्थितः — क्षुरिको. २

निश्शब्दं परमं पदं [ना. बिं. ४९+ — ध्या. बिं. २

निश्शब्दः शून्यभूतस्तु मूर्ध्नि स्थाने ततोऽभ्यसेत् — मैत्रा. ६।२३

निश्शेषितजगत्कार्यः प्राप्ताखिलमनोरथः — महो. २।२९

निषिद्धैर्नवभिर्द्वारैर्निर्जने निरुपद्रवे । निश्चितं त्वात्ममात्रेणावशिष्टं योगसेवया — १यो.त. १४२

निषेधनं प्रपञ्चस्य रेचकाख्यः समीरितः । ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरुच्यते — ते. बिं. १।३२

निष्कलं निर्मलं शान्तं सर्वातीतं निरामयम् । तदेव जीवरूपेण पुण्यपापफलैर्वृतम् [१यो.त.८+ — यो. शि. १।५

निष्कलङ्का समा शुद्धा.. सा ब्रह्मपरमात्मेति नामभिः परिगीयते — म. वा. र. १३

निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् — नारा. २

निष्कलात्मा निर्मलात्मा.. — म. वा. र. १५

निष्कलङ्को निर्विकल्पो निरञ्जनो निराख्यातः शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् — त्रि.म.ना. १।५

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् — श्वेता. ६।१९

निष्कलं निर्गुणं शान्तं निर्विकारं निराश्रयम् । निर्लेपकं निरपायं कूटस्थमचलं ध्रुवम् [ब्र.बिं. २१+ — यो.शि. ३।२१

निष्कलं निर्मलं साक्षात् सकलं गगनोपमम् ।..एतद्रूपं समायातः स कथं मोहसागरे यो. शि. १।२०
निष्कलं निश्चलं शान्तं ब्रह्माहमिति संस्मरेत् त्रि. ता. ५।२०
निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । अमृतस्य परं सेतुं.. श्वेताश्व.६।१९
निष्कलं निष्प्रपञ्चं च परं तत्त्वं तदुच्यते । यस्मादुत्पद्यते सर्वं यस्मिन्सर्वं प्रतिष्ठितम् अमन. १९
निष्कलःसकलोभावःसर्वत्रैव व्यवस्थितः ब्र. वि. ३८
निष्कलात्मा निर्मलात्मा बुद्धात्मा पुरुषात्मकः ते. बिं. ४।६८
निष्कलाय विमोहाय शुद्धायाशुद्ध-वैरिणे । अद्वितीयाय महते श्री-कृष्णाय नमो नमः गो. पू. ४।१२
निष्कलां निष्क्रियां शान्तां... वह्नाननकरांदेवीं गुह्यामेकां समाश्रये गुह्यका. ७३
निष्कले निष्क्रिये शान्ते निरवद्ये निरञ्जने । अद्वितीये परे तत्त्वे व्योमवत्कल्पना कुतः २आत्मो. ३०
निष्कलो निरञ्जनो निरभिमानः १आत्मो. ६
निष्कलोऽस्मि निराकृतिः कुण्डिको. २५
निष्कल्मषो भवेद्भक्तो...राजन् शुद्धान्नभोजनात् । प्रसीदन्ती-न्द्रियाण्याशु सत्त्वं च परिवर्धते भवसं. ४।१५
निष्कामानामेव श्रीविद्यासिद्धिः सौभाग्य. ४
निष्कुलप्रवृत्तिः, निष्केवलज्ञानम् निर्वाणो. १
निष्क्रम्य वनमास्थाय ज्ञानयज्ञो जितेन्द्रियः । कालकाङ्क्षी चरन्नेव ब्रह्मभूयाय कल्पते ना. प. ५।२६
निष्क्रियोऽस्म्यविकारोऽस्मि निर्गुणोऽस्मि निराकृतिः म. वा. र. ९
निष्ठा ज्ञानस्य या परा भ.गी.१८।५०
निष्ठा त्वेव विजिज्ञासितव्या छांदो.७।२०।१
निष्ठा वेदान्तवाक्यानामथ वाचा-मगोचरः । अहं सच्चित्परानन्द-ब्रह्मैवास्मि न चेतरः महो. २।११
निष्ठां भगवो जिज्ञास इति छांदो. ७।२०।१
निष्पत्तौ वैष्णवः शब्दः क्वणतीति क्वणो भवेत् सौभाग्य. १४
निष्पन्ना खिलभावशून्यनिभृति-स्वात्मस्थितिस्तल्लक्षणात्..'निर्वात-स्थितदीपवत्सहजवान् पार्श्व-स्थितिर्दृश्यते अमन. २।७५
निष्पन्नं ब्रह्म तत्तदा । स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम् अद्वैत.४६,४७
निस्तिष्ठन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्या छांदो.७।२०।१
निस्स्तुतिर्निर्नमस्कारो निःस्वधाकार एव च । चलाचलनिकेतश्च यतिर्यादृच्छिको भवेत् [वैतथ्य.३८+ ना.प. ६।४४
निस्स्तोत्रो निर्विकारश्च पूज्यपूजा-विवर्जितः अ.पू.५।१००
निस्स्त्रीकस्य क भोगभूः [याज्ञव.१७+ महो. ३।४८
निस्त्रैगुण्यपदोऽहं कुक्षिस्थानेकलोक-कलनोऽहम् । कूटस्थचेतनोऽहं.. आ. प्र. ६
निस्त्रैगुण्यस्वरूपानुसन्धानं समयम् निर्वाणो. ६
निस्त्रैगुण्यो भवार्जुन भ. गी. २।४५
निस्स्पृहः सर्वकामेभ्यः भ. गी. ६।१८
निस्सङ्गतत्त्वयोगज्ञो निरपेक्षः शनैः शनैः । पाशं छित्वा यथा हंसो.. क्षुरिको. २१
निस्सङ्गव्यवहारत्वाद्भवभावनवर्जनात् । शरीरनाशदर्शित्वाद्वासना न प्रवर्तते अ.पू. ४।८८
निस्सङ्गः प्रज्ञया भवेत् । निश्चलं निश्चरच्चित्तमेकीकुर्यात्प्रयत्नतः अद्वैत. ४५
निस्संशय ऋषिः, निर्वाणो देवता निर्वाणो. १
निस्सृतः सर्वभावेभ्यश्चिह्नं यस्य न विद्यते आयुर्वे. २७
निहत्य धार्तराष्ट्रान्नः भ. गी. १।३६
निहव एकारो विश्वेदेवा औहो इकारः प्रजापतिर्हिंकारः प्राणः स्वरोऽन्नं या वाग्विराट् छांदो. १।१३।२
निहितमस्मामिरेतद्यथावदुक्तं मनसि मैत्रा. ४।५
निहितं गुहायाममृतं विभ्राजमान-मानन्दं तं पश्यन्ति विद्वांसः.. सुबालो. ८।१

निहितं ब्रह्म यो वेद परमे व्योम्नि संज्ञिते। सोऽश्नुते सकलान्कामान्.. कठरु. १४
नीतिरस्मि जिगीषताम् भ.गी.१०।३८
नीरदाभं स्वरं सान्द्रं दक्षिणाभिरुदाहृतम् पं. ब्र. ३
नीरागं निरुपासङ्गं निर्द्वन्द्वं निरुपाश्रयम्। विनिर्याति मनोमोहात्.. महो. ५।६७
नीरुजश्च युवा चैव भिक्षुर्नावसथे वसेत्। परार्थं न प्रतिग्राह्यं.. १सं.सो.२।९३
नीलजीमूतसङ्काशं.. वनमालिनं.. सुधीः संस्मरेत्प्रजपेत् ना.पू.ता.४।१२
नीलः पतङ्गो हरितो लोहिताक्षस्तडिद्गर्भ ऋतवः समुद्राः। अनादिमत्त्वं विभुत्वेन वर्तसे यतो जातानि भुवनानि विश्वा श्वेताश्व. ४।४
नीलाख्या सरस्वती तारोप. ३
नीला च मुखविद्युन्मालिनी सर्वौषधीनां सर्वप्राणिनां पोषणार्थं सर्वरूपा भवति सीतो. १०
नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा। नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा। तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः महाना.९।१२
[+कालिको.५+ ना.उ.ता.१।६
नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकाशनीनाम्। एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तिकराणि योगे श्वेताश्व.२।११
नूनं चैत्यांशरहिता चिद्यदात्मनि लीयते।.. सत्तासामान्यता तदा अ. पू. १।२४
नृकेसरिविग्रहं योगिध्येयं परं पदं साम जानीयाद्यो जानीते सोऽमृतत्वं च गच्छति नृ. पू. १।५
नृचक्षसं त्वा हविषा विधेम तै.आ.३।१५।१
[महाना. १३।१३+ चित्त्यु. १५।१
नृषद्वरस दृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्
[कठो.५।२+महाना.८।६+१२।३+ नृ. पू. ३।१
[ऋ. अ. ३।७।१४= मं. ४।४०।५
नृसिंह इत्याह—यथा यजुरेवैतत् अव्यक्तो.३
नृसिंह एवैकल एष तुरीय एष एवोग्रः नृसिंहो.४।२
नृसिंह एष एव भीषण एष एव नृसिंहो.४।२
नृसिंहत्वाद्भीषणत्वात्...एवद्ब्रह्म नृसिंहो.७।५
नृसिंह देवेश तव प्रसादतः।.. वेदात्मकं ब्रह्म निजं विजानते स्कन्दो. १३
नृसिंहमनृसिंहं भीषणमभीषणं भद्रमभद्रं मृत्युमृत्युममृत्युमृत्युं नमाम्यनमाम्यहमनहं नृसिंहानुष्टुभैव बुबुधिरे नृसिंहो. ६।१
नृसिंहश्चिद्रूप एव नृसिंहो. ९।१
नृसिंहं लोकसंहारं सञ्जघान महाबलः शरभो. ५
नृसिंहं षष्ठं स्थानं (जानीयात्) नृ. पू. २।३
नृसिंहः स्वयमुद्बभौ नृसिंहो. ४।३
नृसिंहानुष्टुभैव जानीयात् नृसिंहो. ६।१
(ॐ) नृसिंहाय विद्महे वज्रनखाय धीमहि। तन्नः सिंहः प्रचोदयात् नृ. प. ४।३
नृसिंहोऽसौ परमेश्वरोऽसौ हि सर्वत्र सर्वदा सर्वात्मा सन्सर्वमत्ति नृसिंहो. ४।२
नेति नेति नह्येतस्मादिति नेत्यन्यत्परं बृह. २।३।६
नेङ्गते न विवर्तते न च वीत इति छाग. ६।१
नेङ्गते सोपमा स्मृता भ.गी. ६।१९
नेति नेतीति रूपत्वादशरीरो भवत्ययम् वराहो. २।६८
नेति नेतीति विहाय यदवशिष्यते सदद्वयं ब्रह्म तत्सिद्धयैलक्ष्यत्रयानुसन्धानः कर्तव्यः अद्वयता. २
नेतिनेतीत्यात्मा[बृह.३।९।२६+४।२।४ +४।४।२२
(अथ) नेति नेत्येतदित्थेत्थेति आर्षे. ९।२
नेति हैवोवाच वेत्थो यथाऽसौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न सम्पूर्यता ३ इति बृह. ६।२।२
नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशाऽस्ति वित्तेनेति [बृ.उ.२।४।२+ बृह. ४।५।३
नेतोऽन्ये विद्यन्ते यश्च ये म इम उपनिहिता इति छांदो.१।१०।२
नेत्पाप्मानं मृत्युमन्ववायानीति बृह. १।३।१०

नेत्यन्यत् परमस्त्यथ नामधेय५ सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेव सत्यम् बृह. २।३।६

नेत्यमृतम्, तदेतत्पुष्पफलं वाचो यत्सत्यम् १ ऐत.३।६।४

नेत्यां विजिज्ञासीतैतारं विद्यान्न मनोविर्जिज्ञासीतमंतारंविद्यात् कौ. त्र. ३।८

नेत्रस्थं जागरितं विद्यात्कण्ठे स्वप्ने समाविशेत् [ब्रह्मो. २१+ ना. प. ५।१३

नेत्रादिरहितोऽस्म्यहम् मैत्रे. ३।१४

नेदममूलं भविष्यति छां. ६।८।३,५

नेदं ब्रह्मेति निश्चयः, एष एव क्षयस्तस्या ब्रह्मेदमिति निश्चयः अ. पू. ५।१९

नेदीयसितमो इव दवीयसि तमा एव आर्षे. ७।१

नेन्द्रियं न शरीरं न नाम न रूपम् ग. शो. ३।२

नेन्द्रियाणि नचैवार्थाः सुखदुःखस्यहेतवः आयुर्वे. २

नेन्मा पाप्मा मृत्युराप्नुवदिति यद्यु चरेत्समापिपयिषेत्तेनो एतस्यै देवतायै सायुज्य५ सलोकतां जयति बृह.१।५।२३

नेमामस्पृक्षद्दिदुदस्यमानः बा. मं. ३

नेमा विद्युतो भान्ति कुतोऽयमग्निः कठो. ५।१५+ [मुण्ड. २।२।१०+श्वेता. ६।१४+ गुह्यका. ४५

नेमे द्यावा पृथिवी न नक्षत्राणि न सूर्यो न चन्द्रमाः (आसन्) महो. १।१

नेशे मे कश्च महिमानमन्यः बा. मं. १२

नेष्टं देहगृहं मम ।.. नाशैकधर्मिणो ब्रूहि कैव कायस्य रम्यता महो. ३।३०

नेह नानास्ति किञ्चन [कठो.४।११+ बृ.उ. ४।४।१९ [त्रि.म.ना. ३।३+अध्यात्मो. ६३+ निरालं. ११

नेह नानेति चाम्नायादिन्द्रो मायाभिरित्यपि । अजायमानो बहुधा मायया जायते तु सः अद्वैतो. २४

नेहन्ते प्रकृतादन्यद्रमन्ते शिष्टवर्त्मनि (सत्त्वस्थाः) महो. ४।१८

नेहाभिक्रमनाशोऽस्ति भ. गी. २।४०

नैर्ऋतदले नीलवर्णे यदा विश्राम्यते मनः । तदा क्रोधश्च कामश्च मनोभिन्नमतिर्भवेत् विश्रामो. ४

नैकत्राशी न वाह्यदेवार्चनं कुर्यात् (यतिः) ना.प.७।१

नैका किंवा युक्तेति गुणाग्निर्मेमे ग. शो. ३।४

नैकान्नाशी भवेत्कंचित् । चित्तशुद्धिर्भवेद्यावत्तावन्नित्यं चरेत्सुधीः ना. प. ५।५०

नैतज्जाग्रन्न च स्वप्नः सङ्कल्पानामसम्भवात् । सुषुप्तभावो नाप्येतदभावाज्जडतास्थितेः अ. पू. ५।१०९

नैतत्त्वय्युपपद्यते भ. गी. २।३

नैतदचीर्णव्रतोऽधीते—नमः परमऋषिभ्यः मुण्ड. ३।२।११

नैतदब्राह्मणो विवक्तुमर्हति समिध५ सोम्याहरोप त्वा नेष्ये छां.उ. ४।४।५

नैतदशकं विज्ञातुं, यदेतद्यक्षमिति केनो. ३।६,१०

नैतद्देवा आप्नुवन्पूर्वमर्शत् ईशा. ४

नैत५ सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृत५ ..अपहतपाप्मा ह्येष ब्रह्मलोकः छान्दो. ८।४।१

नैतावता विदितं भवतीति बृह. २।१।१४

नैतां सृङ्कां वित्तमयीमवाप्तो यस्यां मज्जन्ति बहवो मनुष्याः कठो. २।३

नैति मामेति सोऽर्जुन भ. गी. ४।९

नैते सृती पार्थ जानन् भ. गी. ८।२७

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् । न तस्येशे कश्चन.. महाना.१।१०

नैनमेते रश्मयः प्रत्यायन्ति बृह. ५।५।२

नैनमेते रश्मयः प्रत्याययन्ति (मा.पा.) बृ. उ. ५।४।२

नैनं कृताकृते तपतः बृह. ४।४।२२

नैनं चक्षुर्जहाति सर्वाण्येनं भूतान्यभिरक्षन्ति बृह. ४।१।४

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः [भ. गी. २।२३+ भवसं. २।३८

नैनं छिन्दन्ति शस्त्राणि नैनं दहत्यग्निः... सामर. १००

नैनं पश्यन्त्यचेतसः भ.गी.१५।११

नैनं पाप्मा तपति सर्वं पाप्मानं तपति बृह. ४।४।२३

नैनं पाप्मा तरति सर्वं पाप्मानं तरति बृह. ४।४।२३

नैनं पुरा कालात्प्राणो जहाति बृह. २।१।१०

नैनं पुरा कालान्मृत्युरागच्छति बृह. २।१।१२

नैनं प्राणो जहाति सर्वाण्येनं भूतान्यभिरक्षन्ति — बृह. ४।१।३
नैनं मनो जहाति सर्वाण्येनं भूतान्यभिरक्षन्ति — बृह. ४।१।६
नैनं मृत्युराप्नोति मृत्युरस्यात्मा भवत्येतासां देवतानामेको भवति — बृह. १।२।७
नैनं वाग्जहाति सर्वाण्येनं भूतान्यभिरक्षन्ति — बृह. ४।१।२
नैनं वाचा स्त्रियं ब्रुवन्नैनमस्त्री पुमान्ब्रुवन् — १ऐत.३।८।५
नैनं विद्वांसमनृतं ९ हिनस्ति — बृह. ५।५।१
नैनं श्रोत्र ९ जहाति सर्वाण्येनं भूतान्यभिरक्षन्ति — बृह. ४।१।५
नैनं हृदयं जहाति सर्वाण्येनं भूतान्यभिरक्षन्ति — बृह. ४।१।७
नैनामूर्ध्वं न तिर्यक्च न मध्यं परिजग्रभत् — गुह्यका. ६२
नैनां प्राप्य विमुह्यति — भ.गी.२।७२
नैनेन किञ्चनानावृतं नैनेन किञ्चनासंवृतम् — बृह. २।५।१८
नैरात्म्यवादकुहकैर्मिथ्या दृष्टान्तहेतुभिः । भ्राम्यल्लोको न जानाति वेदविद्यान्तरं तु यत् — मैत्रा. ७।८
नैव किञ्चित् करोति सः — भ. गी. २।२०
नैव किञ्चित् करोमीति — भ. गी. ५।८
नैव कुर्वन्न कारयन् — भ. गी. ५।१३
नैव केनच नाप्यं, कुत उ एतावत् प्रतिगृह्णीयात् — बृह. ५।१४।६
नैव चिन्त्यं न (चाचिन्त्यमचिन्त्यं) चाचिन्त्यं नाचिन्त्यं चिन्त्यमेव च। पक्षपातविनिर्मुक्तं ब्रह्म सम्पद्यते (तदा) ध्रुवम् [त्रि.ता.५।६+ — ब्र. बिं. ६
नैव तत्र काचन भिदाऽस्त्यत्र हि भिदामिव मन्यमानः शतधा सहस्रधा भिन्नो मृत्योः स मृत्युमाप्नोति तदेतदद्वयं स्वप्रकाशं महानन्दमात्मैवैतत् — नृसिंहो. ८।७
नैव तत्र काचन भिदाऽस्त्यथ तस्यायमादेशोऽमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत ॐकार आत्मैव संविशत्यात्मनाऽऽत्मानम् — नृसिंहो. २।७
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन — भ.गी. ३।१८
नैव त्यागफलं लभेत् — भ.गी. १८।८
नैव देहादिसङ्घातो घटवद्दृष्टिगोचरः — वराहो. २।२४
नैवमात्मा प्रवचनशतेनापि लभ्यते न बहुश्रुतेन, न बुद्धिज्ञानाश्रितेन, न मेधया, न वेदैर्नयज्ञैर्नतपोभिरुग्रैः — [illegible]लो.९।१४
नैव सव्यापसव्येन भिक्षाकाले विशेद्गृहान् — १सं.सो.[illegible]३
नैव स्त्री न पुमानेष न चैवायं नपुंसकः । यद्यच्छरीरमादत्ते तेन तेन स युज्यते [श्वेताश्व. ५।१०+ — भवसं. २।२५
नैव स्त्री न पुमानेषा नैव चेयं नपुंसका । यद्यच्छरीरमादत्ते तेन तेनैव युज्यते — गुह्यका. ६५
नैवं पापमवाप्स्यसि — भ.गी.२।३८
नैवं शोचितुमर्हसि — भ.गी.२।२६
नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा । अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते — कठो. ६।१२
नैवातोऽद्वयो ह्ययमात्मैकल एव — नृसिंहो. ८।१
नैवात्मनःसदाजीवेविकारावयवौ तथा — अद्वैत. ७
नैवाददीत पाथेयं यतिः किञ्चिदनापदि। पक्वमापत्सु गृह्णीयात् — १सं.सो.२।९२
नैवास्या अन्तं गच्छत्यनन्ता हि दिशो दिशो वै सम्राट् — बृह. ४।१।५
नैवेह किञ्चनाग्र आसीत् [बृह.१।२।१ +सुबालो. ६।१
नैवैतेन सुरभि न दुर्गन्धि विजानाति — छान्दो. १।२।९
नैत्रैनं ब्रूयुः पितृहासीति, मातृहासीति, न भ्रातृहासीति.. — छांदो. ७।१५।३
नैवैषोऽस्य दोषेण दुष्यति — छांदो.८।१०।१,२
नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुविज्ञानाय प्रेष्ठ — कठो. २।९
नैषा योगसिद्धिः (पूर्वोक्ता) — महावा. २
नैषा (पूर्वोक्ता) मनोलयः — महावा. २

नैषा समाधिः (पूर्वोक्ता) महावा. २
नैषोऽन्धकारोऽयमात्मा महावा. २
नैष्कर्म्यसिद्धिं परमां भ. गी. १८।४९
नैष्कर्म्यं पुरुषोऽश्नुते भ. गी. ३।४
नैष्कर्म्येण न तस्यार्थस्तस्यार्थोऽस्ति न कर्मभिः।..यस्यनिर्वासनंमनः मुक्तिको.२।२०
नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे अर्पिताः कौ. त. ३।९
नो एव स्वयं नास्य प्रजा पुरा कालात्प्रवर्तते कौ. त. ४।६
नो एव स्वयं नास्य प्रजा पुराकालात् सम्मोहमेति कौ.त. ४।१२
नो एव स्वयं नास्य प्रजा पुरा कालात्प्रमीयते कौ. त. ४।१३
नो एवान्यत्रैतस्माद्वसाऽपराणि पञ्च वर्षाणि छांदो.८।११।३
नो एवासाधुना कनीयानेष सर्वेश्वर एष भूताधिपतिरेष सेतुर्विधरणः बृह. ४।४।२२
नो एवासाधुना कर्मणा कनीयानेष ह्येवैनं साधु कर्म कारयति तं यमन्वानुनेषत्येष एवैनमसाधु कर्म कारयति कौ. त. ३।९
नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि [छांदो. ८।११।१,२
नो चेन्मौनं समास्थाय निर्मानो गतमत्सरः । भावयन्मनसा विष्णुं लिपिकर्मार्पितोपमः महो. ३।५७
नोचारयेच्च तद्वाक्यमुच्चार्य नरकं व्रजेत् । (न गुरोरप्रियं कुर्यात् पीडितस्ताडितोऽपि वा) शिवो. ७।३७
नोच्छ्वसेन्न निश्श्वसेन्नैव गात्राणि चालयेत् । एवं भावं नियुञ्जीयात् कुम्भकस्येति लक्षणम् अ. ना. १४
नोत्तिष्ठति न तिष्ठति । न च याति न चायाति न च नेह न चेह चित् महो. ५।१०२
नोत्थापयेत्सुखासीनं शयानं न प्रबोधयेत् । आसीनो गुरुमासीनं शयानं न प्रबोधयेत् शिवो. ७।३१
नोदेति नास्तमायाति सुखदुःखे मनःप्रभा । यथाप्राप्तस्थितिर्यस्य स जीवन्मुक्त उच्यते वराहो. ४।२२
नोद्विजेत् प्राप्य चाप्रियम् भ.गी.५।२०
नोद्वेगी न च तुष्टात्मा संसारे नावसीदति महो. ६।६३
नो न वेदेति वेद च केनो. २।२
नोपजनꣳ स्मरन्निदꣳ शरीरꣳ स यथा प्रयोज्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्तः छांदो.८।१२।३
नोभयतः प्रज्ञो न प्रज्ञानघनो न प्रज्ञो नाप्रज्ञोऽपि नो विदितं वेद्यं नास्तीत्येतन्निर्वाणानुशासनमिति सुबालो.५।१५
नोभयतः प्रज्ञां प्रज्ञानघनां...चतुर्थखण्डात्मिकां मन्यंते श्रीवि.ता.४।१
नौषधानि न मन्त्राश्च न होमा न जपस्तथा । त्रायते मृत्युनोपेतं जरया चापि मानवम् भवसं.१।१६
न्यग्रोधफलमत आहरेतीदं भगव इति भिन्धीति छांदो.६।१२।१
न्यमीमिषदा ३ इत्यधिदैवतम् केनो. ४।४
न्यायार्जितधनं श्रान्ते श्रद्धया वैदिके जने । अन्यद्वा यत्प्रदीयन्ते तद्दानं प्रोच्यते मया जा. द. २।७
न्याय्यं वा प्राप्य चाप्रियम् भ.गी.१८।१५
न्यास इति ब्रह्मा, ब्रह्मा हि परः, परो हि ब्रह्मा महाना.१६।१२
न्यास इत्याहुर्मनीषिणो ब्रह्माणं महाना.१७।१२
न्यासोपयोगस्तथैवार्घ्यदाने च...बीजन्यासो हंसन्यास इति..वर्णयन्ति सूर्यता. ३।१

इत्युपनिषद्वाक्यमहाकोशस्य पूर्वार्द्धः ।

6085
RAMAKRISHNA MISSION LIBRARY
...ALAYA, KARAN NAGAR

This book has been published under the series which is mentioned on the title page of the book. If you want further information for the series as well as for the new titles coming under the series. Please return this card. And mention the series you desire.

Series .. ..